आस्वादीं स्वादीं कृत्वा भुंक्ते स्वादुंकारं भुंक्ते संप· ... कारं लवणंकारं· संपन्नलवणशब्दौ स्वा
दुपर्यायौ· वासरूपेण क्त्वापि· स्वादुं कृत्वा भुंक्ते· अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्॥
एषु कृञो णमुल् स्यात्· सिद्धः अप्रयोगोस्यैवंभूतश्चेत् कृञ् व्यर्थः प्रायः प्रयोगानर्ह इ
त्यर्थः अन्यथाकारं एवंकारं कथंकारं इत्थंकारं भुंक्ते इदं भुंक्ते इत्यर्थः सिद्धेति किं शिरोन्यथे
कृत्वा भुंक्ते· यथातथयोरसूयाप्रतिवचने॥ पूर्वः सिद्धः प्रयोगे इत्येव असूयया प्रतिवच
ने· यथाकारं अहं भोक्ष्ये किं तवानेन· कर्मणि दृशिविदोः साकल्ये॥ कर्मण्युपपदे णमुल् स्या
त् कन्यादर्शं वरयति सर्वाः कन्या इत्यर्थः ब्राह्मणवेदं भोजयति यं ब्राह्मणं जानाति लभ
ते विचारयति वा तं सर्वं भोजयतीत्यर्थः यावति विन्दजीवोः॥ यावद्वेदं भुंक्ते यावल्लभ
ते तावद्भुंक्ते इत्यर्थः यावज्जीवमधीते॥ चर्मोदरयोः पूरेः॥ कर्मणीत्येव· चर्मपूरं स्तृणा
ति उदरपूरं भुंक्ते· वर्षप्रमाणे ऊलोपश्चास्यान्यतरस्याम्॥ कर्मण्युपपदे पूरेर्णमुल् स्यादूका
रलोपश्च वा· समुदायेन वर्षप्रमाणे गम्ये· गोष्पदप्रं वृष्टो देवः गोष्पदपूरं अस्यतीति किं· उपप
दस्य मा भूत्· मूषिकाबिलपूरं· चेले क्नोपेः॥ चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल् स्यात् वर्षप्र
माणे· चेलक्नोपं वृष्टो देवः· वस्त्रक्नोपं वृष्टो देवः· वस्त्रक्नोपं वसनक्नोपं निमूलसमूलयोः कषः॥
कर्मणीत्येव· कषादिषु यथाविध्यनुप्रयोगः॥ अत्र प्रकरणे एवं... इति न संबध्यते॥ निमूलकाषं
कषति· समूलकाषं कषति· निमूलसमूलं कषति सर्वः एकस्यापि धातोः पिधाने अस्यानिमूलकाषं

स.को०

श्रीबाउ मैं

विशेषणसं०। बंधातमेदः तेनसामान्यविशेषभावेन विशेषणविशेष्यभावः शुक्लश्च ग्नासौ गुणिश्च॥१॥
पश्चकर्मसु पिषेणमुलः गुत्तं घपेसंपिनष्टि। शुष्कपिनष्टीत्यर्थः। चूर्णपेषं रूक्षपेषं साम्प्रतं जीवेषु हन
घ्नसादहः। कर्मणीत्येव सम्प्रतं घातं हन्ती अप्रतनकारं करोति। जीवनाशं हन्। हुणोति जीवन्तीति जीव
इगुपधज्ञेति कः। जीवन्तं गृह्णातीत्यर्थः करणेहनः। पादघातं हन्ती पादेन हन्तीत्यर्थः पथाविध्यनुप्रयो
गार्थः सन्नुनिसूसमासाभोयेषांगः। निभ्यधातुसंबंधेतु हिंसार्थानां चोत वेष्यते द्वेर्निपिनः। लिदयपतं
चनस्ततस्मिन्नुकरणेउपदेपिने णमुलः उदपेषं पिनष्टि उदकेनपिनष्टीत्यर्थः। इस्तेवर्तिग्रहोः। हस्ता वर्ति
रणे। हस्तवर्तं वर्तयति कारवर्तं हस्तेनगुलिकां करोतीत्यर्थः। हस्तग्राहं गृह्णाति करग्राहं पाणिग्राहं॥
स्वेपुषः करणइत्येव स्वद्रव्यपोषं पुष्णाति स्वरूपपर्यायविशेषेषु च णमुलः स्वपोषं पुष्णाति धनपोषं
गोपोषं अधिकरणे बंधः। चक्रबंधं बध्नाति संज्ञायां मुः बध्नाते णमुल संज्ञायां क्रौंचबंधं बंधः। म
यूरिकाबंधं अट्टालिकाबंधं बंधविशेषाणां नामधेयान्येतानि कर्तोर्जीवपुरुषयोर्नाशिवहोः। जीवनाशं न
श्यति जीवो नश्यतीत्यर्थः पुरुषवाहं वहति पुरुषो वहतीत्यर्थः। ऊर्ध्वे शुषिपूरोः। ऊर्ध्वे कर्तरि उर्द्धशो
षं शुष्यति वृक्षादिऊर्द्धएव तिष्ठन्शुष्यतीत्यर्थः। ऊर्ध्वे पूरं पूर्यते ऊर्ध्वमुखएव घयादिः वर्षोदकादिना
पूर्णोभवतीत्यर्थः। उपमाने कर्मणि च। चात्कर्तरि घृतनिधायं निहितं जलं घृतमिव सुरक्षितमित्य
र्थः। अजकनाशं नष्टः अजकइव नष्ट इत्यर्थः। कषादिषु यथाविध्यनुप्रयोगः। यस्मात् णमुलुक्तः स एव अ
नुप्रयोक्तव्य इत्यर्थः तथैवोदाहृतं उपदंशस्तृतीयायां ... ... प्रतिसंबध्यतेऽत्र
तीयाप्रभृतीन्यन्यतरस्यामिति वा समासः। मूलकोपदंशं ... ... उपमानस्य पूर्वं कस्य

६१

॥६०॥

॥६०॥

121

नदृष्टं साम वामदेव्यं। सिद्धे यस्येति लोपेन किमर्थं ड्यड्ड्यौ। ग्रहणमातदर्थे ध्वस्त। वामदेव्यस्य नस्त्व
रे। परिवृतो रथः॥ वस्त्रैः परिवृतो वास्त्रो रथः। रथः किं। वस्त्रेण परिवृतः कायः॥ समन्ताद्वेष्टितः परिवृ
तउ्याते। ते नेह न। छात्रैः परिवृतो रथः॥ पाण्डुकंबलादिनिः॥ पाण्डुकंबलेन परिवृतः। पाण्डुकंबली। पाण्डु
कंबलशब्दो राजास्तरण वर्णकंबलस्य वाचकः॥ मत्वर्थीयेनैव सिद्धे वचनमेणोनिवृत्त्यर्थं॥ द्वैपवै
याघ्रादञ्। द्वीपिनो विकारो द्वैपं। तेन परिवृतो द्वैपो रथः। एवं वैयाघ्रः॥ कौमारापूर्ववचने। कौ
मारेत्यविभक्तिको निर्देशः॥ उभयत्रैवेदं निपातनमिदं। अपूर्वपतिं कुमारीमुपपन्नः। कौमारः पतिः
पद्वा। अपूर्वपतिं कुमारी पतिमुपपन्नोपि। कौमारी भार्या। तत्रोद्धृतममत्रेभ्यः॥ शरावे उद्धृत ओदनः। शाराव
ओदनः। उद्धृत इति हि उद्धरणपूर्वके निधाने वर्तते। तेन सप्तमी। उद्धृत्य निहित इत्यर्थः। स्थण्डिला
च्छ। ...तरक्षितो। तत्रैव। मन्दुरापल्वौ। द्रोगाम्यतौ। स्थण्डिले शयितुं नियमोऽस्य स्थाण्डिलः। ति
स्थः। संस्कृतं भक्षाः॥ सप्तम्यन्ता [illegible] स्यात् संस्कृतोऽर्थे यः संस्कृतं तत् भक्ष्यं चेत्स्यात्। भ्राष्ट्रे संस्कृता भ्रा
ष्ट्राः। अष्टसु कपालेषु संस्कृतोऽष्टाकपालः॥ शूलोखाद्यत्॥ आप वादः। शूले संस्कृतं शूल्यं

मांसं ॥ उदकं वा पयो वा शेषः ॥ तस्यां संस्कृतं उदश्व्यं ॥ दध्नष्ठक् ॥ दध्नि संस्कृतं ॥ दाधिकं ॥ उदश्वितोऽन्यतरस्यां ॥
ठक् स्यात् ॥ पक्षे अण् ॥ इसुसुक्तान्तात्कः ॥ इस उस उक् एतेन्तदंतादंगात्परस्य ठस्य कः स्यात् ॥ उदश्वित्कं
मथ्यति वर्द्धंत इत्युदश्वित् ॥ तस्मिन् संस्कृतं ॥ औदश्वित्कः ॥ औदश्वितः ॥ इसुसुक्ता ॥ अग्निपदोक्तपोर्ग्रहणा
न्नेह ॥ आशिषा चरति आशिषिकः ॥ उषा चरति ॥ औषिकः ॥ दोष उपसंख्यानं ॥ दोष्णा चरति दौ[illegible]क्षी
रउं वक्तू ॥ आनुसंस्कृतमित्येव संबध्यते [illegible] इति ॥ तेन पूर्वा गवामपि लवति ॥ क्षैरेयी ॥ सास्मि
न् पौर्णमासीति ॥ इति शब्दात्संज्ञायामिति लक्ष्यते ॥ पौषी पौर्णमास्यास्मिन्पौषो मासः ॥ आग्रहा
यण्यश्वत्थाट्ठक् ॥ अग्रेहायनमस्या इत्याग्रहायणी ॥ अत्रादेशात्क [illegible] पूर्वपदात्संज्ञा
यामिति णत्वं ॥ आग्रहायणी पौर्णमासी ॥ अस्मिन्नाग्रहायणिको मासः ॥ अश्वत्थेन युक्ता पौ
र्णमासी अश्वत्थः ॥ निपातनात्पौर्णमास्यामपि लुप् ॥ आश्वत्थिकः ॥ विभाषा फाल्गुनी श्रवणा
कार्तिकी चैत्रीभ्यः ॥ एभ्यष्ठग्वा पक्षे अण् ॥ फाल्गुनिकः ॥ फाल्गुनो मासः ॥ श्रावणिकः ॥ श्रावणः
कार्तिकिकः ॥ कार्तिकः ॥ चैत्रिकः ॥ चैत्रः ॥ सास्य देवता ॥ इंद्रो देवतास्य ऐंद्रं हविः ॥ पाशुपतं ॥

बाहस्पत्यः। यज्यमानम् येन उद्देश्य पाविशेषो देवता। मंत्रस्तुत्या वा। ऐन्द्रो मंत्रः॥ ॥ आग्नेयो वै ब्राह्मणो देवतयेति तु
शैषिकेर्थे तु सर्वत्राग्नेर्ढक्। कस्येत्। कस्य इकारादेशः स्यात्। अस्य सन्नियोगेनायस्येति लोपात्परत्वा
दादिवृद्धिः। को ब्रह्मा देवतास्य कायं हविः। श्रीर्देवतास्य श्रायं। शुक्राद्घन्। शुक्रियं। अपोनप्त्रपांनप्तृभ्यां घः।
अपोनप्त्रियं। अपांनप्त्रियं। अपोनपात् अपांनपाच्च देवता। अस्य सन्नियोगेन नप्तृरूपं निपात्यते ॥ अतए
वापोनपातेऽपांनपाते तु ब्रूहीति प्रैषः। छ च। योगविभागो यथासंख्यनिरासार्थः। अपोनप्त्रीयं। अपां
नप्त्रीयं। शतरुद्राद्घश्च। शतं रुद्रा देवता अस्य शतरुद्रियं। शतरुद्रीयं। छघयोर्विधानसामर्थ्या
द्विगोर्लुगनपत्य इति न लुक्। महेन्द्राद्घाणौ च। चात् छः। महेन्द्रियं हविः। माहेन्द्रं। महेन्द्रीयं। सोमाट्ट्यण्। सौ
म्यं। टित्वान्ङीप्। सौमी ऋक्। वाय्वृतुपित्रुषसो यत्। वायव्यं। ऋतव्यं। रीङृतः। अकृद्यकारे सार्वधातुके
यकारे च्वौ च परे ऋदन्तांगस्य रीङादेशः स्यात्। यस्येति। पित्र्यं। उषस्यं। द्यावापृथिवीशुनासीरमरुत्वद
ग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। चाद्यत्। द्यावापृथिवीयं। द्यावापृथिव्यं। शुनासीरीयं। शुनासीर्यं।
अग्नेर्ढक्। आग्नेयः। कालेभ्यो भववत्। मासिकं। प्रावृषेण्यं। महाराजप्रोष्ठपदाट्ठञ्। माहाराजिकं।
प्रोष्ठपदिकं। देवताद्वन्द्वे च। अत्र वृद्धिरुत्तरपदयोः। द्वयोर्वृद्धिः स्यात् ञिति णिति किति च परे। आग्निमारुतं।

८

नेऽन्यपरस्य तौ मरुः। परस्य किं। ऐन्द्राग्नः। द्वार्घाच्च वरुणस्य। द्वार्घारपरस्य वरुणस्य मरुद्धि। ऐन्द्रावरुणं
सौर्याह्निकं। आग्निवारुणी। मनडुहौ। तौ स्मिन्वर्त्तत इति नवयज्ञादिभ्य उपसंख्यानं। नावयज्ञिकः का
लः। पाकयज्ञिकः। पूर्णमासादण्वक्तव्यः। पूर्णमासोऽस्यां वर्त्तते पौर्णमासी तिथिः। पितृव्यमातुल
मातामहपितामहाः। एते निपात्यन्ते। पितुर्भ्रातरि व्यत्। पितुर्भ्राता पितृव्यः। मातुर्डुलच्। मातुर्भ्राता मा
तुलः। मातृपितृभ्यां पितरि डामहच्। मातुः पिता मातामहः। पितामहः। मातरि षिच्च। मातामही। पिताम
ही। अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः। सकारपाठसामर्थ्यान्न षः। अविसोढं। अविदूसं। अविमरीसं।
तिलान्निष्फलात्पिञ्जपेजौ। तिलपिञ्जः। तिलपेजः। वंध्यतिलः। पिञ्जश्छांदसि डिच्च। तिल्पिञ्जः। तस्य सम
हः। काकानां समूहः काकं। वाकं। भिक्षादिभ्योऽण्। भिक्षाणां समूहो भैक्षं। गार्भिणानां समूहो गार्भिणं। इह
भस्याढे इति पुंवद्भावे कृते। इनण्यनपत्ये। अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात्। तेन नस्तद्धित इति टि
लोपो न। युवतीनां समूहो यौवनं। शात्रवमाद्युदात्तादेरञ्। यौवतं। गोत्रोक्षोष्ट्रोरभ्राजराजन्यराजपुत्रवत्स
मनुष्याजाद्वुञ्। एभ्यः समूहे वुञ् स्यात्। लौकिकमिह गोत्रं तच्चापत्यमात्रं। गुर्वोरनाको। पुवुण तयोरनु
नासिकयणी। कमादन अकेणतावादेशौ स्तः। ग्लुचुकायनानां समूहो ग्लौचुकायनकं। औक्षकमिच्च।

॥१०२॥

॥१०२॥

125

पा

दि। आपत्यस्य चेति यलोपे प्राप्ते। प्रकृत्याके राजन्यमनुष्ययुवानः॥ राजन्यकं। मानुष्यकं। वृद्धाच्चेति
२२ वक्तव्यं। वार्द्धकं। केदाराद्यञ्च॥ वाद्धुञ्च। कैदार्यं। कैदार्यकं। गणिकाया यञिति वक्तव्यं॥ गाणिक्यं। ठञ्कवचि
नश्च। चात्केदारादपि। कवचिनां समूहः कावचिकं। कैदारिकं। ब्राह्मणमाणववाडवाद्यत्॥ ब्राह्मण्यं। मा
णव्यं। वाडव्यं। पृष्ठादुपसंख्यानं। पृष्ठ्यं। ग्रामजनबन्धुसहायेभ्यस्तल्॥ ग्रामता। जनता। बन्धुता। गजसहायाभ्यां
चेति वक्तव्यं। गजता। सहायता। अह्नः खः क्रतौ॥ अहीनः। अहर्गणसाध्यः सुत्याकः। क्रतुसिध्यर्थः। क्र
तुरित्यर्थः। क्रतौ किं। आह्नं। [illegible]खण्डिकादिभ्यश्च॥ अन्हष्टक। खोरे वेति नियमादिह लोपो। पर्श्वा णस्व
क्तव्यः॥ सितिर। सिति परे पूर्वपदस्यात्। अस्त्वादेर्गुणोन। पर्शूनां समूहः पार्श्वं। अनुदात्तादेरञ्॥ का
पोतं। मायूरं। खण्डिकादिभ्यश्च॥ अञ् स्यात्। खण्डिकानां समूहः खाण्डिकं। चरणेभ्यो धर्मवत्॥ काठकं। छा
न्दोग्यं। अचित्तहस्तिधेनोष्ठक्॥ साक्तुकं। हास्तिकं। धैनुकं। केशाश्वाभ्यां यञ्छावन्यतरस्यां॥ पक्षे ठगणौ।
केश्यं। कैशिकं। आश्वीयं। आश्वं। पाशादिभ्यो यः॥ पाश्या। तृण्या। धूम्या। वन्या। वात्या। खलगोरथात्॥
खल्या। गव्या। रथ्या। इनित्रकट्यचश्च॥ खलादिभ्यः क्रमात्स्युः। ख[illegible]। गोत्रा। रथकट्या। खला
दिभ्य इनिर्वक्तव्यः॥ डाकिनी। कुटुंबिनी। आकृतिगणोऽयं। विषयो देशे॥ षष्ठ्यन्ताद्देशे इत्यर्थे स्युः यथा यंताप

रिशालकेतद्वैसवेदेशः॥शिबीनां विषयो देशः शैबः। देशे किं। देवदत्तस्य विषयोऽनुवाकः॥ राजन्यादिभ्यो

वुञ्॥ राजन्यकः। भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ॥ भौरिकीणां विषयो देशो भौरिकिविधं। ऐषुकारिभक्तं। सारसायनभक्तं। सोऽस्यादिरिति छंदसः प्रगाथेषु। पंक्तिरादिरस्येति पांक्तः प्रगाथः। स्वार्थउपसंख्यानं। त्रिष्टुबेव त्रैष्टुबं। संग्रामे प्रयोजनयोद्धृभ्यः। सोऽस्यनुवर्तते। सुभद्रा प्रयोजनमस्य संग्रामस्येति सौभद्रः। भरता योद्धारोऽस्य संग्रामस्य भारतः। तदस्यां प्रहरणमिति क्रीडायां णः।

दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। मौष्टा। घञः साऽस्यां क्रियेति ञः। घञन्तात् क्रियावाचिनः प्रथमान्तादस्या-

ति मिति सप्तम्यर्थे स्त्रीलिङ्गे ञः प्रत्ययः स्यात्। घञ इति कृद्ग्रहणात् इतिकारककृदन्तस्यापि ग्रहणं। श्येनतिल-

स्यपाते ञे। श्येनतिलस्य येऽनुं मुमागमः स्यात् ञः प्रत्यये परे पातशब्दे उत्तरपदे। श्येनपातोऽस्यां वर्ततेति श्यैन-

स्व ४ पाता मृगया। तिलपातोऽस्यां वर्तते तैलम्पाता स्वधा। श्येनतिलस्य किं। दण्डपातोऽस्यां तिथौ वर्तते दाण्डपा-

॥१०३॥ ता। तदधीते तद्वेद। व्याकरणमधीते वेद वा वैयाकरणः। क्रत्वुक्थादिसूत्रान्ताट्ठक्। क्रतुविशेषवाचिना-

मेव ग्रहणं। तेभ्योऽनुख्यायैभ्यो वेदितीति तत्प्रतिपादक ग्रन्थपरेभ्यस्तद्ध्येतरि। आग्निष्टोमिकः।

वाजपेयिकः। उक्थं सामविशेषः। तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थं। तदधीते वेद वा औक्थि- ॥१०३॥

पा २

कः॥ न्नरव्या। यन्तिस्यच शब्दात् गणे नेष्यते। न्यायं नैयायिकः। वृत्तिं वार्त्तिकः। लोकायतं लौकायतिकः।
इत्यादि। सूत्रान्तात् अकल्पादेरेवेष्यते। सांग्रहसूत्रिकः। अकल्पादेः किं। काल्पसूत्रः। विद्यालक्षणक
ल्पांताच्चेति वक्तव्यं। वायसविद्यिकः। गौलक्षणिकः। आश्व[illegible]णिकः। पाराशरकल्पिकः। अंगक्षत्र
धर्मत्रिपूर्वा विद्यांतान्नेति वक्तव्यं। आंगविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रिविद्या विद्या त्रिविद्या। नाम
धाते वेदवा त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्यश्च। यवक्रीतमधिकृत्य कृतमाख्यानं यव
क्रीतं तदधीते वेत्ति वा यावक्रीतिकः। वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता। अ
धिकृत्य कृते ग्रंथे इत्यर्थे वृद्धाच्छः। तस्य लुब् वा आख्यायिकेभ्यो बहुलमिति लुप्। ततोऽनेन ठक्। वासवद
त्तिकः। ऐतिहासिकः। पौराणिकः। सर्वादेः सादेश्च लुग् वक्तव्यः। सर्ववेदानधीते सर्ववेदः। सर्वतंत्रः। सर्ववार्त्तिकः।
द्विगोर्लुगिति लुक्। द्वितंत्रः। इकन् पदोत्तरपदात्। शतषष्टेः षिकन् पथः। पूर्वपदिकः। उत्तरपदिकः। शतपथिकः।
शतपथिकी। षष्टिपथिकः। षष्टिपथिकी। क्रमादिभ्यो वुन्। क्रमकः। क्रमप[illegible] शिक्षा मीमांसा। क्रमादिः। अ
नुब्राह्मणादिनिः। तदधीते तद्वेद इत्यर्थे। ब्राह्मणसदृशो ग्रंथोऽनुब्राह्मणं। तदधीते अनुब्राह्मणी। मत्वर्थे
नैव सिद्धे आरम्भ वा यनार्थमिनिः। वसंतादिभ्यष्ठक्। वासंतिकः। अथर्वणमधीते आथर्वणिकः। दाण्डिना

प... चेन्निपातनात् । हृत्वेयो ना प्रोक्तात्लुक् । प्रोक्तार्थकप्रत्ययान्तस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात् ।
पाणिना प्रोक्तं पाणिनीयम् । तदधीयते विदन्ति वा पाणिनीयाः । अत्र अणो लुक् ... गार्ग्य वि ... के
... पाणिनस्य ... णिच् ... इति टिलोपः । ततो ... यञ् ... एषु त्रिषु पाणिनि
... लुगणञोः ... प्रत्ययान्तात् ... गोत्रप्रत्ययान्तात् ... गोत्रप्रत्ययान्तात् ... परयो
... लुक् स्यात् । कौरव्यः पिता । कौरव्यः पुत्रः । श्याफल्कः पिता । श्याफल्कः पुत्रः । वासिष्ठः
पिता । वासिष्ठः पुत्रः । तैकायनिः पिता । तैकायनिः पुत्रः । ... कैशिवाघ ... कौहडः । ततः ... कौहडः पुत्रः ।
... इति ... लुक् तु न ... प्रतिपदोक्तस्य ...
... ग्रहणात् । पाणिनिना प्रोक्तं पाणिनीयम् ... तुनागोत्रेय ... अनन्तरं ... प्रमाणम् ।
ततोऽध्येतृवेदितृणां लुक् ... विशेषः । पाणिनीयः । पाणिनीयाः ... तत्र चायिनः
कठचरकाल्लुक् । कठचरकाभ्यां परस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात् । प्रोक्तार्थे ... अथ श्रावध्याया ... परिमाणम् ... ॥१०४॥
पाणिनेः ... तदधीयते विदन्ति वा ... छन्दोब्राह्मणानि च तद्विषयाणि । छन्दांसि ब्राह्मणानि च प्रोक्तप्र-
त्ययान्तानि तद्विषयाणि स्युः । अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः । कठेन प्रोक्तमधीयते कठाः ।
संख्यापूर्वकादित्यादि ... कलापक मधीते ... लापकः । ...

वैशंपायनांतेवासिब्रगणिनिः॥ तस्य कम्बरकादिति लुकू॥ तनोरण्॥ तस्य ग्रोकाल्लुकू॥ तदस्मिन्नस्तीति
देशे तन्नाम्नि॥ उदुंबराः संत्यस्मिन्देशे औदुंबरः॥ तेन निर्वृत्तं॥ कुशांबेन निर्वृत्ता कौशांबी नगरी॥ तस्य नि
वासः॥ शिवानां निवासो देशः शैवः॥ अदूरभवश्च॥ विदिशाया अदूरभवं नगरं वैदिशं॥ चकारेण प्रागुक्ता
स्त्रयोर्थाः संनिधाप्यंते॥ तेन वक्ष्यमाणास्त्रयाणां चातुरर्थिकं सिध्यति॥ ओरञ्॥ अणोपवादः ककु
लु॥ काक्षतवं॥ नद्यां मतुप्॥ इक्षुमती॥ मतोश्च बह्वजंगात्॥ बह्वचः अंगं यस्य मतुपः तदंता दञ् तं ४ ना
तं ६ णा॥ सेऽकार्वं॥ बद्धेति किं॥ अहिमतं॥ अग्रहणं वद्वजिति तद्विशेषणं यथा स्यात्॥ मत्यंतविशेषणं मा
भूत्॥ वृद्धेदः कूपेषु॥ अणोपवादः॥ दार्घवरत्रेण निर्वृत्तः दैर्घवरत्रः कूपः॥ उदकू च विपाशः॥ विपाश उत्तरे कू व ६
लेये कूपास्तेष्वञ्॥ अवदत्तैर्य आरसः॥ दत्तेन निर्वृत्तः कूपः दात्तः॥ उदकू किं॥ दक्षिणतः कूपेष्वणेव॥ संकलादि
भ्यश्च॥ कूपेष्विति निवृत्तं॥ संकलेन निर्वृत्तं सांकलं॥ पौष्कलं॥ स्त्रीषु सौवीरसाल्वप्राक्षु॥ स्त्रीलिंगेषु पू
र्वदेशेषु वाच्येष्वञ्॥ सौवीरे दत्तामित्रेण निर्वृत्ता दात्तामित्री॥ नगरी॥ साल्वे वैधूमाग्नी॥ प्राचि मा
कंदी॥ सुवास्त्वादिभ्योण्॥ अञोपवादः॥ सुवास्तोरदूरभवं सौवास्तवं॥ वर्णु॥ वार्णवं॥ अण्ग्रहणं नद्यां
मतुपो बाधनार्थं॥ सौवास्तवी॥ रोणी॥ रोणी शब्दात्तदंताच्छाण्कूपाञोपवादः॥ रौणः॥ अजकरोगा॥ को

पथाच्चः। अत्रोपवादः। कार्णछिद्रकं। कार्णछिद्रकः कूपः। कार्कवाकवं वैशंकवं। वुञ्छण्कठजिलसेनिरढञ्ण्य
यफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतं
गमप्रगदिन्वराहकुमुदादिभ्यः। सप्तदशभ्यः सप्तदश प्रत्ययाः स्युः चातुरर्थिकाः। अरीहणादिभ्यो वुञ्। आरी
हणकं। कृशाश्वादिभ्यश्छण्। कार्शाश्वीयं। ऋश्यादिभ्यः कः। ऋश्यकं। कुमुदादिभ्यष्ठ
च्। कुमुदिकं। काशादिभ्य इलः। काशिलं। तृणादिभ्यः सः। तृणसं। प्रेक्षादिभ्य इनिः। प्रेक्षी। अश्मादिभ्यो रः। अश्मरं। सख्यादिभ्यो ढञ्। साखेयं। संकाशादिभ्यो ण्यः। सांकाश्यं। बलादिभ्यो यः। बल्यं। पक्षादिभ्यः फक्। पाक्षायणः। पथः पंथ च। पांथायनः। कर्णादिभ्यः फिञ्। कार्णायनिः। सुतंगमादिभ्य इञ्। सौतंगमिः। प्रगद्यादिभ्यो ञ्यः। प्रागद्यं। वराहादिभ्यः कक्। वाराहकं। कुमुदादिभ्यष्ठक्। कौमुदिकं। जनपदे लुप्। जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात्। लुपि युक्तवद्व्यक्तिवचने। लुपि सति प्रकृतिवल्लिंगवचने स्तः। पंचालानां निवासो जनपदः पंचालाः। कुरवः। अंगाः वंगाः कलिंगाः। तदशिष्यं संज्ञाप्रमाणत्वात्। युक्तवद्वचनेन कर्तव्यं संज्ञानां प्रमाणत्वात्। लुब्योगाप्र
ख्यानात्। लुबपि न कर्तव्यो ऽवयवार्थस्य हृत्वतीतेः। योगप्रमाणे च तदभावेऽदर्शनं स्यात्। यदिह यो

गस्यावयवार्थस्येदं बोधकं स्यात् तदा तद्दृष्टावेव दृश्येत। अथ यान्यप्रयार्थवचनमर्थस्यान्यप्रमाणत्वात्।
अन्यपदार्थप्रधानमिति एवंरूपं वचनमशिष्यं कुतः अर्थस्य लोकतः सिद्धेः। कालोपसर्जने च तुल्यं। अ
तो ऽतीतायाः रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसो ऽद्यतनः। विशेषणमुपसर्जनमित्यादि पू
र्वाचार्यैः परिभाषितं तत्राप्यशिष्यत्वं समानं लोकप्रसिद्धेः। विशेषणानां चाजातेः। लुबर्थस्य विशेष
णानामपि तद्वल्लिंगवचने स्तो जातिं वर्जयित्वा। पंचाला रमणीयाः। गोदौ रमणीयौ। जातेः किं।
पंचालादेः जनपदः। गोदौ ग्रामः। हरीतक्यादिषु व्यक्तिः। हरीतक्याः फलानि हरीतक्यः। खलतिकादिषु
वचनं। खलतिकस्य पर्वतस्य अदूरभवानि खलतिकं वनानि। मनुष्यलुपि प्रतिषेधः। मनुष्यलक्षणे लु
बर्थे विशेषणानां न लुबंतस्येव लिंगवचने भवतः। चंचा अभिरूपः। वरणादिभ्यश्च। अजनपदार्थ आ
रंभः। वरणानाम अदूरभवं नगरं वरणाः। शर्करायां वा। अस्माच्चातुरर्थिकस्य वा लुप् स्यात्। कुमुदादिषु
शर्कराया गणेऽपि पाठात्। कुमुदादौ वराहादेश्च पाठसामर्थ्यात् पक्षे ठक् छौ। वाग्रहणसामर्थ्यात् सिद्धे
औत्सर्गिकोऽण्। तस्य लुब्विकल्पः। षड् रूपाणि। शर्करा। शार्करं। शार्करिकं। शर्करीयं। शार्करिकं।
शार्करकं। नद्यां मतुप्। चातुरर्थिकः। इक्षुमती। मध्वादिभ्यश्च। मतुप् स्यात् दीर्घमारंभः। मधुमान्।

न १

॥१०६॥

कुमुदनडवेतसेभ्यो ड्मतुप् ॥ कुमुद्वान् नड्वान् वेतस्वान् ॥ आद्यपोऽग्य इति ॥ अग्ये मा डुपधायाश्चेति व
स्यमाणेन ॥ महिषाच्चेति वक्तव्यं ॥ महिष्मान्नाम देशः ॥ नडशादाड्ड्वलच् ॥ नड्वलः ॥ शाद्वलः ॥ शादो जंबालघासयोः ॥
शाद्वलः ॥ शिखाया वलच् ॥ शिखावलं ॥ उत्करादिभ्यश्छः ॥ उत्करीयः ॥ नडादीनां कुक् च ॥ नडकीयं ॥ कु
ञ्चाऽऽह्रस्वत्वं च ॥ कुंचकीयः ॥ तक्षन्नलोपश्च ॥ तक्षकीयं ॥ बिल्वकादिभ्यश्छस्य लुक् ॥ नडाद्यंतर्गता बिल्व
कादयः ॥ तेभ्यश्छस्य लुक् कृतकुगागमे तत्परो ॥ बिल्वा यस्यां संति सा बिल्वकीया ॥ तस्यां भवा बैल्वकाः ॥ वेत्रकीया ॥
वैत्रकाः ॥ छस्य किं ॥ छमात्रस्य लुग्यथा स्यात् कुगो निवृत्तिर्मा भूत् ॥ अन्यथा संनियोगशिष्टानामिति
कुगपि निवर्त्तेत ॥ लुग्ग्रहणं सर्वलोपार्थं ॥ लोपो यमादेः स्यात् ॥ ७ ॥ इति चातुरर्थिकाः ॥ ॥ शेषे ॥ अप
त्यादिचतुरर्थ्यंतादन्योऽर्थः शेषस्तत्राणादयः स्युः ॥ चक्षुषा गृह्यते चाक्षुषं रूपं ॥ श्रावणः शब्दः ॥ औप
निषदः पुरुषः ॥ दृषदि पिष्टाः दार्षदाः सक्तवः ॥ उलूखले क्षुण्णः औलूखलो यावकः ॥ अश्वैरुह्यते आश्वो
रथः ॥ चतुर्भिरुह्यते चातुरं शकटं ॥ चतुर्दश्यां दृश्यते चातुर्दशं रक्षः ॥ शेष इति लक्षणं चाधिकारश्च ॥ त
स्य विकार इतः प्राक् शेषाधिकारः ॥ राष्ट्रावारपाराद्घखौ ॥ आभ्यां क्रमाद्घखौ स्तः शेषे ॥ राष्ट्रियः ॥ अवा
रपारीणः ॥ अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यं ॥ अवारीणः ॥ पारीणः ॥ पारावारीणः ॥ इह

॥१०६॥

ज

य२

ऽकृतिविशेषा ह्यादयश्छञ्छ्लंताः। अथ पाठ्यन्ते। तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते।
ग्रामाद्यखञौ। ग्राम्यः। ग्रामीणः। कत्र्यादिभ्यो ढकञ्। कुत्सितास्त्रयः कत्रयः। तत्र जातादिः। कात्रेयकः।
नागरेकः। ग्रामादित्यनुवृत्तेर्ग्रामेयकः। कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु। कौलेयकः श्वा। कौलोऽन्यः।
कौक्षेयकोऽसिः। कौक्षोऽन्यः। ग्रैवेयकोऽलंकारः। ग्रैवोऽन्यः। नद्यादिभ्यो ढक्। नादेयं। माहेयं। वाराण-
सेयं। दक्षिणापश्चात्पुरसस्त्यक्। दक्षिणेत्याजंतमव्ययं। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः। कापिश्याः
ष्फक्। कापिश्यां जातादि। कापिशायनं मधु। कापिशायनी द्राक्षा। रंकोरमनुष्येऽण् च। रांकवो गौः। रां-
कवायणः। अमनुष्ये किं। रांकवको मनुष्यः। द्युप्रागपागुदक्प्रतीचो यत्। दिव्यं। प्राच्यं। अपाच्यं। उदीच्यं।
प्रतीच्यं। कंथायाष्ठक्। कांथिकः। वर्णौ वुक्। वर्णुर्नदः। तस्य समीपदेशो वर्णुः। तद्विषयार्थवाचिकंथा-
शब्दात् वुक्। यथा हि जातं हिमवस्तु कांथकं। अव्ययात्त्यप्। अमेहक्वतसित्रेभ्य एव। अमांतिकसहार्थ-
योः। अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः। परिगणनं किं। उपरिष्टाद्भवः औपरिष्टः। अव्ययानां
भमात्रे टिलोपः। अनित्योऽयं बहिष्षष्टिलोपविधानात्। आरातीयः। त्यब्नेर्ध्रुव इति वक्तव्यं। नित्यः। नि-
सो गते। ह्रस्वात्तादौ तद्धिते। ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते। निर्गतो वर्णाश्रमेभ्यो निष्ट्यः

वास्यव

तेरे हन २ नं ४

शांडालदिः। आरण्याण। आरण्याः सुमनसः। दूरादेत्यः। दूरेत्यः। उत्तरादाहञ्। औत्तराहः। ऐषमो ह्यःश्वसोऽन्य
तरस्यां। एषमस्त्यः। पक्षे वक्ष्यमाणो ह्युञ्ठौ। ऐषमस्त्यं। ऐषमस्तनं। ह्यस्त्यं। ह्यस्तनं। श्वस्त्यं। श्वस्तनं।
पक्षे शो वक्ष्यमाणौ ष्यो। तीरूप्योत्तरपदादञ्ञौ। यथासंख्येन। काकतीरं। पाल्वलतीरं। शैवरूप्यं। तार
रूप्यं। तादिति नोक्षौ। बाहुरूप्यं बाभ्रवमात्यन्त। बाहुरूप्यं। दिक्पूर्वपदादसंज्ञायां ञः। आगोपवादः। पौर्वशालः।
संज्ञायां किं। संज्ञात्वायां। प्रकृते मीत्तन। सर्वे वृकामशम्यापत्वः। सर्ववृकामशमः। प्राचां ग्रामनगराणां
मित्युत्तरपदवृद्धिः। मद्रेभ्योऽञ्। दिक्पूर्वपदादित्येव। दिशो मद्राणामिति मद्रपर्युदासाद्वादिर्वृद्धिः।
पौर्वमद्रः। आपरमद्रः। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्। अञ्स्यात्। शैवपुरं। प्रस्थोत्तरपदपलद्या
दिकोपधादण्। के। माहकिप्रस्थः। पालदः। नैलीनकः। कण्वादिभ्यो गोत्रे। एभ्यो गोत्रप्रत्ययान्तेभ्यो
ऽण् स्यात्। कण्वो गर्गादिः। काण्व्यस्य छात्राः काण्वाः। इञश्च। गोत्रे य इञ् तदन्तादण्। दाक्षाः। गोत्रे किं।
॥१०५॥ सौतंगमेरिदं सौतंगमीयं। गोत्रमिह शास्त्रीयं न तु लौकिकं। तेनेह न। पाणिनीयं। न द्व्यचः प्राच्यभरतेषु ॥१०७॥
इञश्चेत्यणोऽपवादः। प्राष्ठीयाः। काशीयाः। भरतानां प्राच्यत्वेऽपि पृथगुपादानमन्यत्र प्राच्यग्रहणे भ
रतानामग्रहणस्य लिंगं। वृद्धिर्यस्याचामादिस्तद् वृद्धं। यस्य समुदायस्याचां मध्ये आदिरैज् इत्तद्वृद्धसंज्ञं

रवः। यौगंधरकः। यौगंधरः। मद्रवृज्योः कन्। जनपदवुञोपवादः। मद्रेषु जातो मद्रकः। वृजिकः। कोपधा
दण्। माहिषिकः। कच्छादिभ्यश्च। देशवाचिभ्योऽण्। वुञोऽदेरपवादः। काच्छः। सैंधवः। मनुष्यतत्स्थयो
र्वुञ्। कच्छादिभ्यः। अणोपवादः। कच्छे जातादिः काच्छको मनुष्यः। काच्छकं हसितं। मेतिकं। काच्छो
गोः। अपदातौ साल्वात्। साल्वशब्दस्य कच्छादित्वाद् वुञि सिद्धे नियमार्थमिदं। अपदातावितिकिं। सा
ल्वः पदातिर्व्रजति। गोयवाग्वोश्च। साल्वाद्वुञ्। कच्छाद्यणोपवादः। साल्वको गौः। साल्विकायवागूः। सा ल्विका
ल्वमन्यत्। गर्तोत्तरपदाच्छः। देशे। अणोपवादः। वृकगर्तीयं। उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थं। ग
हादिभ्यश्च। छः। गहीयः। मुखपार्श्वतसोर्लोपश्च। मुखतीयं। पार्श्वतीयः। अव्ययानां समासे टिलोपस्या
नित्यतां ज्ञापयितुमिदं। कुग्जनस्य परस्य च। जनकीयं। परकीयं। देवस्य च। देवकीयं। स्वस्य च। स्वकीयं।
वेणुकादिभ्यश्छण्वक्तव्यः। वैणुकीयं। वैत्रकीयं। औत्तरपदकीयं। प्राचां कटादेः। प्राग्देशवाचिनः कटादे
श्छः स्यात्। अणोपवादः। काटनगरीयं। काटघोषीयं। काटपल्वलीयं। राज्ञः क च। वृद्धाच्छे सिद्धे ता संनि
योगेन ककारादेशार्थं विधीयते। राजकीयं। वृद्धादकेकान्तखोपधात्। अकेकान्तात् खोपधाच्च
वृद्धाद्देशवाचिनश्छः स्यात्। ब्राह्मणको नाम जनपदो यत्र ब्राह्मणा आयुधजीविनः। तत्र जातो ब्राह्मण

प:६

॥१०८॥

कापि[illegible]स्य मलिकायाः । आपोसुरवीयं । कंथापलदनगरग्रामह्रदोत्तरपदात् । कंथापंचकोत्तरपदाद्देशवा
चिनो वृद्धाच्छः स्यात् । गह्वरादेरपवादः । दाक्षिकंथीयं । दाक्षिपलदीयं । दाक्षिनगरीयं । दाक्षिग्राम
यं । दाक्षिह्रदीयं । पर्वताच्च । पर्वतीयः । विभाषामनुष्ये । मनुष्यभिन्ने पर्वताच्छो वा स्यात् । पक्षेऽण् ।
पर्वतीयानि पार्वतानि वा फलानि । अमनुष्ये किं । पर्वतीयो मनुष्यः । कृकणपर्णाद्भारद्वाजे । भारद्वा
जदेशवाचिभ्यामाभ्यां छः । कृकणीयं । पर्णीयं । भारद्वाजे इति किं । कार्कणं । पार्णं । युष्मदस्मदोरन्यतरस्यां
खञ्च । वा छः । पक्षेऽण् । युवयोर्युष्माकं वा अयं युष्मदीयः । अस्मदीयः । तस्मिन्नणि च युष्माका
स्माकौ । युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्मा
कः । तवकममकावेकवचने । एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकी
नः । तावकः । मामकीनः । मामकः । छे तु प्रत्ययोत्तरपदयोश्च । मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये
उत्तरपदे च । त्वदीयः । मदीयः । अर्द्धाद्यत् । अर्द्ध्यः । परावराधमोत्तमपूर्वाच्च । परार्द्ध्यः । अवरार्द्ध्यः । अ
धमार्द्ध्यः । उत्तमार्द्ध्यः । दिक्पूर्वपदाट्ठञ् च । पौर्वार्द्धिकं । पूर्वार्द्ध्यं । ग्रामजनपदैकदेशादञ्ठञौ ।
ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्द्धान्तादञ्ठञौ स्तः । इमे ऽस्माकं

॥१०८॥

वा घत

137

लुकि [illegible] प्रत्ययस्य लुक् स्यात्। श्रविष्ठासु जातः श्रविष्ठः फल्गुनः इत्यादि। चित्रारेवतीरोहिणी
भ्यः स्त्रियां [illegible] चित्रायां जाता चित्रा। रेवती। रोहिणी। आभ्यो लुक्कृते [illegible] तल्लुकि [illegible] लुकि कृतेऽपि
पत्न्यां [illegible] फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ॥ स्त्रियामित्येव। फल्गुनी। अषाढा।
भा० ४ श्रविष्ठाषाढाभ्यां छण् वक्तव्यः॥ अ[illegible]। श्राविष्ठीयः। आषाढीयः। [illegible] प्रोष्ठपदानां प्रोष्ठपदानामुत्तर
पूर्वस्या वा [illegible] जाते [illegible]। प्रोष्ठपदासु जातः प्रोष्ठपादो माणवकः [illegible]
प्रोष्ठपदासु जातः प्रोष्ठपदः। बहुवचनं [illegible] निर्देशात् पर्यायेऽपि गृह्यते। [illegible] पादः। स्थानान्तगोशालखर
शालाच्च। एभ्यो जातार्थस्य लुक् स्यात्। गोस्थाने जातो गोस्थानः। गोशालः। खरशालः। विभाषासे
नेति नपुंसकत्वे ह्रस्वत्वं च [illegible] शालायामिति [illegible]। एभ्यो जातार्थस्य लुग्वा स्यात्।
वत्सशाले जातो वत्सशालः। वात्सशालः इत्यादि। जातार्थे प्रतिप्रसूतो ण्वादिष्ठक् [illegible]। शतभिषजि जातः शतभिषः। शा
तभिषजः। नक्षत्रेभ्यो बहुलम्। जातार्थप्रत्ययस्य बहुलं लुक् स्यात्। रोहिणः। रौहिणः। कालेभ्य [illegible]
कृतलब्धक्रीतकुशलाः। तत्रेत्येव। स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः। प्रायभवः। तत्रेत्येव। स्रुघ्ने प्रायेणाबा
हुल्येन भवति स्रौघ्नः। उपजानूपकर्णोपनीवेष्ठक्। औपजानुकः। औपकर्णिकः। औपनीविकः। संभू

पदा१ सर्वैर्हेतुर्वाचिनो ऽवामादेरचो वृद्धिर्ञिणितिकिति तद्धिते । सर्ववार्षिकः । अपरहैमनः । अवयवाद्धिं ।
सर्वासु वर्षासु भवः पौर्ववर्षिकः । ऋतोर्वृद्धिमद्विधावयवानामिति तदंतविधिः सर्वत्र । इहतु न । अवप
वत्साभावात् । सुसर्वार्द्धाज्जनपदस्य । उत्तरपदस्य वृद्धिः । सुपाञ्चालकः । सर्वपाञ्चालकः । अर्द्धपाञ्चाल
कः । जनपदतदवध्योरिति वुञ् । सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदंतविधिः । दिशोऽमद्राणाम् । दि
ग्वाचकाज्जनपदवाचिनो वृद्धिः । सर्वपांचालकः । दिशः किं । सर्वपंचालानामयं पौर्वपंचालकः । अम
द्राणां किं । पौर्वमद्रः । योगविभाग उत्तरार्थः । प्राचां ग्रामनगराणाम् । दिशः परेषां नगरवाचिनां ग्राम
वाचिनामवयवस्य च वृद्धिः । सर्वैषुकामशम्यां भवः । सर्वैषुकामशम्यः । सर्वपाटलिपुत्रकः । अपिहा नगरे १
पराण्हार्द्रमूलप्रदोषावस्कराद्वुन् । सर्वाण्हः । अपराण्हकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करक
पथः पंथ च । पथि जातः पंथकः । अमावास्याया वा । अमावास्यकः । अमावास्यः । अ च । अमावास्यः । सिंध्व
पकराभ्यां कन् । सिंधुकः । कन्थाघणिमनुष्यतुजिवप्राह्ये । अपकरकः । अणे सर्गिकेणि प्राप्ते । अणि
औव । क्रमात्ततः । सैंधवः । आपकरः । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषा
ढाबहुलाल्लुक् । एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात् । लुक्तद्धितलुकि । तद्धित

स्यात्॥ त्यदादीनि च॥ वृद्धसंज्ञानि स्युः॥ वृद्धाच्छः॥ शालीयः॥ मालीयः॥ तदीयः॥ एङ् प्राचां देशे॥ एङ्यस्याचामादि
स्तद् वृद्धसंज्ञं वा स्याद्देशाभिधाने॥ एणीपचनीयः॥ ऐणीपचनः॥ गोनर्दीयः॥ गौनर्दः॥ भोजकटीयः॥ भौजकटः॥ एङ् किं॥ आ
हिछत्रः॥ कान्यकुब्जः॥ वा नामधेयस्येति वाच्यं॥ देवदत्तीयः॥ दैवदत्तः॥ भवतष्ठक्छसौ॥ वृद्धाद्भवत एतौ स्तः॥ भा
वत्कः॥ भवदीयः॥ वृद्धादित्यनुवृत्तेः शत्रन्तादेव॥ भावतः॥ काश्यादिभ्यष्ठञ्ञिठौ॥ इकार उच्चारणार्थः॥
काशिकः॥ काशिका॥ वैदिकी॥ वैदिका॥ आपदादिपूर्वपदात्कालान्तात्॥ आपदादिराकृतिगणः॥ आपत्कालि
की॥ आपत्कालिका॥ वाहीकग्रामेभ्यश्च॥ वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः॥ छस्यापवादः॥ कास्तीरं ना
वाहीकग्रामः॥ कास्तीरिकः॥ कास्तीरिका॥ विभाषोशीनरेषु॥ एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः॥
सौदर्शनिकः॥ सौदर्शनिका॥ सौदर्शनीयः॥ ओर्देशे ठञ्॥ उवर्णान्ताद्देशवाचिनष्ठञ्॥ निषादकर्षूः॥ नैषा
दकर्षुकः॥ केणादीति ह्रस्वः॥ देशे किं॥ पटोश्छात्राः पाटवाः॥ ञिठं व्यावर्तयितुं ठञ्ग्रहणं॥ वृद्धाच्छस्य परत्वादप
वाधनात्॥ दाक्षिकर्षुकः॥ वृद्धात्प्राचां॥ प्राग्देशवाचिनो वृद्धाद्देवेति नियमार्थं सूत्रं॥ आढकजम्बुकः॥ नेह॥ मल्ल
वास्तु॥ मालवास्तवः॥ धन्वयोपधाद्वुञ्॥ धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ्
स्यात्॥ ऐरावतं धन्व॥ ऐरावतकः॥ सांकाश्यकः॥ काम्पिल्यशब्दे वुञ्छणादिसूत्रेण प्राप्तो॥ सांकाश्यकः॥

कांपिल्यकः। ... पुरवहांताच्च। एतदंताद्वृद्धाद्देशवाचिनो वुञ् स्यात्। छस्यापवादः। मालाप्रस्थः। नां
दीपुरकः। पैलुवहकः। पुरांतग्रहणम प्रागर्थं प्राग्देशे। लृतरोणिस्तद्वे। रोपधे तोः प्राचां। रोपधादीकारांता
च्च प्राग्देशवाचिनो वृद्धाद्वुञ् स्यात्। पाटलिपुत्रकः। काकंदकः। जनपदतदवधोश्च। जनपदवाचिनस्तदव
धिवाचिनश्च वृद्धाद्वुञ् स्यात्। आदर्शकः। त्रैगर्तकः। अवृद्धादपि बहुवचनविषयात्। अवृद्धाद्वृद्धाच्च ज
नपदात्तदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ् स्यात्। अवृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धा
ज्जनपदात्। आंगकः। अवृद्धाज्जनपदावधेः। आजमीढकः। वृद्धाज्जनपदात्। दार्वकः। वृद्धाज्जनपदावधेः।
कालंजरकः। विषयग्रहणं किं। एकशेषेण बहुत्वे मा भूत्। वर्तनी च वर्तन्यः। तासु भवो वार्तनः। कच्छाग्नि
वक्त्रवर्तोत्तरपदात्। देशवाचिनो वृद्धादवृद्धाच्च वुञ् स्यात्। दारुकच्छकः। कांडाग्नकः। सैंधुवक्त्रकः। बाहु
वर्तकः। धूमादिभ्यश्च। देशवाचिभ्यो वुञ् स्यात्। धौमकः। तैर्थकः। नगरात्कुत्सनप्रावीण्ययोः। कुत्सने प्रा
वीण्ये च गम्ये नगरशब्दाद्वुञ् स्यात्। नागरकश्चोरः। शिल्पी वा। एतयोः किं। नागरा ब्राह्मणाः। अरण्यान्म
नुष्ये। वुञ् स्यात्। आरण्याणोऽपवादः। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यं। आ
रण्यकः। वा गोमयेषु। आरण्यकाः आरण्या गोमयाः। विभाषा कुरुयुगंधराभ्यां। वुञ्। कौरवकः। कौ

न २

क ३

ग्रामजनपदस्य वा पौर्वार्द्धं ।। पौर्वार्द्धिका ।। ग्रामस्य सर्वस्मिन्नर्द्धे भवा इति तद्धितार्थे समासः ।। ध
न्त्र पूर्वाणां सार्थ्या । अग्रे तु सुर्यौं स्फेयत्तो प्यनुकर्षः संभाव्येत । मध्यान्मः । मध्यमं । अस्य प्रतिके । मध्य
शब्दाद्धकारः स्यात् सांप्रतिकेर्थे । उत्कर्षापकर्षहीनो मध्यो वैयाकरणः । मध्यं दारु । नातिह्रस्वं ना
तिदीर्घमित्यर्थः । द्वीपादनुसमुद्रं यञ् । समुद्रसमीपे यो द्वीपस्तत्र भवा द्वैप्या । परार्द्धाद्यञ् स्यात् । द्वैप्या द्वै
प्या ।। कालाट्ठञ् । कालवाचिभ्यष्ठञ् स्यात् । मासिकं । सायंप्रातिकं । पौनःपुनिकः । कथं तर्हि शार्वरस्य तमसो
निषिद्धये इति कालिदासः । ऋतुदिनीषु [illegible] इति [illegible] समानकालीनं । आक्कालीनमित्यादि । अप
भ्रंशा एवैते इति प्रामाणिकाः । तत्र जातः इति प्राक्कालाधिकारः । प्रावृष एण्यः स्यात् । प्रावृषेण्यो बला
हकः । शारदिकं श्राद्धं । विभाषा रोगातपयोः । शारदिकः । शारदो वा रोगः । आतपो वा । एतयोः किं । शारदं दधि ।
निशाप्रदोषाभ्यां च । वा ठञ् स्यात् । नैशिकं । नैशं । प्रादोषिकं । प्रादोषं । श्वसस्तुट् च । श्वस्शब्दाट्ठञ्
वा स्यात् तस्य तुडागमश्च । द्वारादीनां च । एषां न वृद्धिः ऐजागमश्च । शौवस्तिकं । संधिवेलाद्यृतुनक्षत्रे
भ्योऽण् । संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवाचिभ्योऽण् स्यात् । संधिवेलायां भवं सांधिवेलं । ग्रै
ष्मं । [illegible] संधिवेला । संध्या । अमावास्या वा । त्रयोदशी । चतुर्दशी । पंचदशी । पौर्णमासी । प्रतिपत् । स

सां वत्स
रिक

142

॥१०१०॥

वत्सरात्फलपर्वणोः॥ सांवत्सरं फलं पर्व वा॥ सांवत्सरिकमन्यत्॥ प्रावृष एण्यः॥ प्रावृषेण्यः॥ वर्षाभ्यष्ठक्॥ व
र्षासु धृतो वार्षिकं वासः॥ कालात्साधुपुष्प्यत्पच्यमानेषु॥ साध्वर्थे॥ सर्वत्राण् च तलोपश्च॥ हेमंता
द् एतस्मात् तलोपश्च वेदलोकयोः॥ चकारात्स्वेनर्तुणा॥ हैमनं॥ हैमंतं॥ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्यु
ट्युलौ तुट् च॥ सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च॥ तुटः
आगमादेशः॥ अनद्यतनस्यादिति दर्शनात्॥ सायंतनं॥ चिरंतनं॥ प्राह्णेप्रगयोरेदंतत्वं निपात्यते॥
प्राह्णेतनं॥ प्रगेतनं॥ दोषातनं॥ दिवातनं॥ चिरपरुत्परारिभ्यस्त्नो वक्तव्यः॥ चिरत्नं॥ परुत्नं॥ परारित्नं॥ अग्रादि
पश्चाड्डिमच्॥ अग्रिमं॥ आदिमं॥ पश्चिमं॥ अंताच्च॥ अंतिमं॥ विभाषा पूर्वाह्णापराह्णाभ्यां॥ आभ्यां ट्यु
ट्युलौ वा स्तस्तयोस्तुट् च॥ पक्षे ठञ्॥ पूर्वाह्णेतनं॥ अपराह्णेतनं॥ घकालतनेष्वलुक्॥ पूर्वाह्णः सोढोऽस्येति
विग्रहे तु पूर्वाह्णतनं॥ अपराह्णतनं॥ पौर्वाह्णिकं॥ आपराह्णिकं॥ तत्र जातः॥ सप्तमीसमर्थाज्जात इत्य
र्थेऽणादयो घादयश्च स्युः॥ स्रुघ्ने जातः स्रौघ्नः॥ औत्सः॥ राष्ट्रियः॥ अवारपारीणः इत्यादि॥ प्रावृषष्ठप्॥ ए
ण्यस्यापवादः॥ प्रावृषि जातः प्रावृषिकः॥ संज्ञायां शरदो वुञ्॥ ऋत्वणोऽपवादः॥ शारदका दर्भविशेषा
मुद्गविशेषाश्च॥ उत्तरपदस्य॥ अधिकारोऽयं॥ हनस्तोऽचिण्णलोः [illegible]॥ अवयवादृतोः॥ अवयववाचिनः

॥१०१०॥

143

ते॥ स्रुघ्ने संभवति स्रौघ्नः॥ कोशाड्ढञ्॥ कौशेयं वस्त्रं॥ कालात्साधुपुष्प्यत्पच्यमानेषु॥ हेमंते साधु हेमंतं॥
प्राकारः॥ वसंते पुष्प्यंति वासंत्यः कुंदलताः॥ शरदि पच्यंते शारदाः शालयः॥ उप्ते च॥ हेमंते उप्यंते हैमंता
यवाः॥ आश्वयुज्या वुञ्॥ अपवादः॥ आश्वयुज्यां तु उप्ताः आश्वयुजकाः माषाः॥ ग्रीष्मवसंतादन्यतरस्यां॥
पक्षे ऋत्वण्॥ ग्रैष्मकं ग्रैष्मं॥ वासंतकं॥ वासंतं॥ देयमृणे॥ कालादित्येव॥ मासे देयमृणं मासिकं॥ क
लाप्यश्वत्थयवबुसाद्वुन्॥ यस्मिन्काले मयूराः कलापिनो भवंति स उपचारात्कलापी॥ तत्र देयमृणं
कालापकं॥ अश्वत्थस्य फलमश्वत्थस्तद्युक्तः कालोऽश्वत्थः॥ यस्मिन्काले अश्वत्थाः फलंति तत्र देयमृ
णमश्वत्थकं॥ यस्मिन्यवबुसमुत्पद्यते तत्र देयं यवबुसकं॥ ग्रीष्मावरसमाद्वुञ्॥ ग्रीष्मे देयमृणं ग्रैष्मकं॥
आवरसमकं॥ संवत्सराग्रहायणीभ्यां ठञ्च॥ चाद्वुञ्॥ सांवत्सरिकं॥ सांवत्सरकं॥ आग्रहायणिकं॥ आ
ग्रहायणकं॥ व्याहरति मृगः॥ कालात्॥ ठञ् ... सप्तम्यंताद्व्याहरतीत्यर्थे यथाविहितं प्रत्ययो भवति॥ व्याहरतीति स
मृगः॥ [illegible] निशायां व्याहरति नैशो मृगः॥ नैशिकः॥ तदस्य सोढं॥ कालादित्येव॥ निशासहचरितमध्यय
नं निशा[illegible] सोढमस्य नैशः॥ नैशिकः॥ तत्र भवः॥ स्रुघ्ने भवः स्रौघ्नः॥ राष्ट्रियः॥ दिगादिभ्यो यत्॥ दिश्यं॥ वर्ग्यं॥ शरीराव
यवाच्च॥ दंत्यं॥ कर्ण्यं॥ प्राचां नगरांते॥ प्राचां देशे नगरांते पूर्वपदस्योत्तरपदस्य चामादेरचो वृद्धिर्णि

तिकिति च। सुह्मनगरे भवः सौह्मनागरः। पौंड्रनागरः। प्राच्यां किं। मद्रनगरस्य दक्षुन्तत्र भवो माद्रनगरः।
जंगलधेनुवलजांतस्य विभाषितमुत्तरं। जंगलाद्यंतस्यांगस्य पूर्वपदस्य वा आदेर्वृद्धिरुत्तरप
दस्य तु नित्यं ञिति णिति किति च। कुरुजंगले भवं कौरुजंगलं। कौरुजांगलं। वैश्वधेनवं। वैश्वधैनवं। सौवर्ण
वालजं। सौवर्णवालजं। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। दातेयं। कौक्षेयं। कलशिर्घटस्तत्र भवं काल
शेयं। ग्रीवाभ्योऽण् च। ग्रैवं। ग्रैवेयं। गंभीराञ्ञ्यः। गांभीरेषु भवं गांभीर्यं। अव्ययीभावाच्च। परि
मुखे भवं। पारिमुख्यं। परिमुखादिभ्य एवेष्यते। नेह। औपकूलं। अंतःपूर्वपदाट्ठञ्। अध्यात्मा
दिभ्यश्च। वेश्मनि अंतर्वेश्म तत्र भवं आंतर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्यते। अध्यात्म
भवमाध्यात्मिकं। अनुशतिकादीनां च। एषामुभयपदवृद्धिः स्यात् ञिति णिति किति च। आधिदैवि
कं। आधिभौतिकं। ऐहलौकिकं। पारलौकिकं। अध्यात्मादिराकृतिगणः। देविकाशिंशपादि
त्यवाड्दीर्घसत्रश्रेयसामात्। एषामचामादेरचो वृद्धिप्रसंगे आत् स्याञ्ञिति णिति किति च। दाविका। देवि
काकूले भवा दाविका। कूलः शालयः। शिंशिपाया विकारः शांशपश्चमसः। पलाशादिभ्यो
वेत्यण्। दित्यौहरदं दात्यौहं। दीर्घसत्रे भवं दार्घसत्रं। श्रेयसि भवं श्रायसं। ग्रामासृधनुस्वरिता।

अंत ६ ग

॥११२॥

॥११३॥

पा२

ठञ्स्यात्॥ अथयोप्तावादिन्येव॥ पारियानिकः॥ जिह्वामूलांगुलेश्छः॥ जिह्वामूलीयः॥ अंगुलीयः॥ व
र्गांताच्च॥ कवर्गीयः॥ अशब्दे यत्खावन्यतरस्यां॥ पक्षे छः॥ वर्ग्यः॥ मद्वर्ग्यः॥ मद्वर्गीणः॥ मद्वर्गीयः॥ अ
शब्दे किं॥ कवर्गीयो वर्णः॥ कर्णललाटात्कनलंकारे॥ कर्णिका॥ ललाटिका॥ तस्य व्याख्यान इति च
व्याख्यातव्यनाम्नः॥ सुपां व्याख्यानः सौपो ग्रंथः॥ तैङः॥ कार्तः॥ सुप्सु भवं सौपं॥ बह्वचोंतोदात्ताट्ठञ्॥ ष
त्वणत्वयोर्विधायकं शास्त्रं षत्वणत्वं तस्य व्याख्यानं तत्र भवो वा षात्वणत्विको ग्रंथः॥ क्रतुयज्ञेभ्य
श्च॥ सोमसाध्येषु यागेषु तेषु प्रसिद्धेऽत्रान्यतरोपादानेन सिद्धे उभयोपादानसामर्थ्यादसोमके
ऽपीह गृह्यते॥ अग्निष्टोमस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः॥ वाजपेयिकः॥ पाकयज्ञिकः॥
नावयज्ञिकः॥ बहुवचनं स्वरूपनिरासार्थं॥ अनेनोदात्तार्थ आरंभः॥ अध्यायेष्वेवर्षेः॥ ऋषिशब्दे
भ्यो लक्षणया व्याख्येयग्रंथवृत्तिभ्यः तस्य व्याख्याने चाध्याये ठञ्स्यात्॥ वसिष्ठेन दृष्टो मंत्रो वसिष्ठ
स्तस्य व्याख्यानस्तत्र भवो वा वासिष्ठिकोऽध्यायः॥ अध्यायेषु किं॥ वासिष्ठी ऋक्॥ पौरोडाशपुरोडा
शात्ष्ठन्॥ पुरोडाशसहचरितो मंत्रः पुरोडाशः॥ स एव पौरोडाशः॥ ततष्ठन्॥ पौरोडाशिकः॥ छंदसो
यदणौ॥ छंदस्यः॥ छांदसः॥ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्॥ द्व्यचः॥ ऐ

षिकः। पास्तुकः। नरान्। वा नु हैतिकः। ब्राह्मणिकः। आर्थिकः। इत्यादि। अण्गायनादित्यः। ठञादेरपवा
दः। आर्गायनः। औपनिषदः। वैयाकरणः। ततः आगतः। स्रुघ्ना दागतः स्रौघ्नः। ठगायस्थानेभ्यः। शुल्क
शालाया आगतः शौल्कशालिकः। शुण्डिकादिभ्योऽण्। आयस्थानठक्कुम्भादीनां चापवादः। शुण्डिका
दागतः शौण्डिकः। कार्कणः। तैर्थः। विद्यायोनिसंबंधेभ्यो वुञ्। औपाध्यायिकः। पैतामहकः। ऋतष्ठञ्
वुञोऽपवादः। हौतृकं। भ्रातृकं। पितुर्यच्च। चाद्वुञ्। रीङ् ऋतः। यस्येति लोपः। पित्र्यं। पैतृकं। गोत्रादंकव
त्। बिदेभ्य आगतं बैदं। गार्गं। दाक्षं। औपगवकं। गोत्रचरणाद्वुञ्। नञः शुचीश्वरक्षेत्रज्ञकुशलनिपु
णानां। नञः परेषां शुच्यादीनां यानामादेरचो वृद्धिः सर्वपदस्य तु वा जित्यादौ। आशौचं। अशौचं। आ
नैश्वर्यं। अनैश्वर्यं। आक्षेत्रज्ञं। अक्षेत्रज्ञं। आकौशलं। अकौशलं। आनैपुणं। अनैपुणं। हेतुमनुष्ये
भ्योऽन्यतरस्यां रूप्यः। समादागतं समरूप्यं। विषमरूप्यं। पक्षे गहादित्वात् छः। समीयं। विषमी
यं। देवदत्तरूप्यं। दैवदत्तं। मयट् च। सममयं। विषममयं। देवदत्तमयं। प्रभवति। ततस्त्येव। हिमवतः

॥११३॥

प्रभवति हैमवती गंगा। विदूराञ्ञ्यः। विदूरात्प्रभवति वैदूर्यो मणिः। तद्गच्छति पथिदूतयोः। स्रुघ्नं गच्छ
ति स्रौघ्नः पन्था दूतो वा। अभिनिष्क्रामति द्वारं। तदित्येव। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वा
यि

॥११३॥

147

पा

कौ॰ अैलाकिः ग्रैष्मः । महाराजाट्ठञ् । माहाराजिकः । वासुदेवार्जुनाभ्यां वुन् । वासुदेवकः । अर्जुनकः । गो
त्रक्षत्रियाख्येभ्यो बहुलं वुञ् । अणोपवादः । परत्वाद्वृद्धाच्छं बाधते । ग्लुचुकायनिर्गोत्रक्षत्रियस्य ग्लौचुका
यनकः । नाकुलकः । बहुलग्रहणान्नेह । पाणिनो गोत्रक्षत्रियस्य पाणिनीयः । जनपदिनां जनपदवत्सर्वं ज
नपदेन समानशब्दानां बहुवचने । जनपदस्याभिधायिनां बहुवचने जनपदवाचिनां समानश्रुतीनां

ना॰४

जनपदवत्सर्वं स्यात्प्रत्ययः प्रकृतिश्च । जनपदतदवध्योश्चेति प्रकरणे ये प्रत्ययास्ते शक्ता अतिदिश्यं
ते । अंगाः जनपदो गोत्रक्षत्रियस्यांगकः । अंगाः क्षत्रियास्तत्क्षत्रियस्यांगकः । जनपदिनां किं । पंचाला ब्रा
ह्मणास्तत्क्षत्रियस्य पांचालः । जनपदेनेति किं । पौरवो राजा गोत्रक्षत्रियस्य पौरवीयः । तेन प्रोक्तं । पाणि
नीयं । तित्तिरिवरतंतुखंडिकोखाच्छण् । छंदोब्राह्मणानीति तद्विषयता । तित्तिरिणा प्रोक्तम
धीयते तैत्तिरीयाः । काश्यपकौशिकाभ्यामृषिभ्यां णिनिः । काश्यपेन प्रोक्तमधीयते काश्यपिनः ।
कलापिवैशंपायनांतेवासिभ्यश्च । कलाप्यंतेवासिभ्यः । हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः ।
वैशंपायनांतेवासिभ्यः । आलंबिनः । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । पुरातनो यांता प्रोक्तेषु णिनिः
स्यात् । पक्षेऽण् । पुराणप्रोक्ताश्च ब्राह्मणकल्पास्तेषु वेति । पुराणेन चिरंतनेन मुनिना प्रोक्ताः ।

क २१

रेः॥ अधिकृत्य कृते ग्रंथे। तदित्येव। शारीरमधिकृत्य कृतो ग्रंथः शारीरकीयः। शारीरं साध्यमिति त्वं भेदोप चारात्॥ शिशुक्रंदयमसभद्वंद्वेंद्रजननादिभ्यश्छः॥ शिशूनां क्रंदनं शिशुक्रंदः। तमधिकृत्य कृतो ग्रंथः शिशुक्रंदीयः। यमस्य सभा यमसभं। क्लीबत्वं निपातनात्॥ यमसभीयः। किरातार्जुनीयं इंद्रजननादिरा कृतिगणः। इंद्रजननीयं। विरुद्धभोजनीयं॥ सोस्य निवासः॥ स्रुघ्नो निवासोस्य स्रौघ्नः॥ अभिजनश्च॥ स्रुघ्नोभिजनोस्य स्रौघ्नः। यत्र स्वयं वसति स निवासः। यत्र पूर्वैरुषितं सोभिजन इति विवेकः॥ आयुधजीविभ्यश्छः पर्वते॥ पर्वतवाचिनः प्रथमांतादभिजनवाचिनः शब्दादस्येत्यर्थे छः स्यात्। हृद्गोलः पर्वतोभिजन एषामायुधजीविनां ते हृद्गोलीयाः। आयुधेति किं। ऋक्षोदः पर्वतोभिजन एषां ते आर्क्षोदाः॥ शंडिकादिभ्यो ञ्यः॥ शंडिकोभिजनोस्य शांडिक्यः॥ सिंधुतक्षशिलादिभ्योणञौ॥ सिंध्वादिभ्यो ण् तक्षशिलादिभ्यो ञ् स्यात्। सैंधवः। तक्षशिला नगरी अभिजनोस्य ताक्षशिलः॥ तूदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः॥ तूदी अभिजनोस्य तौदेयः। सालातुरीयः। वार्मतेयः। कौचवार्यः॥ भक्तिः॥ सोस्येत्यनुवर्तते। भज्यते सेव्यत इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः॥ अचित्तादेशकालाट्ठक्॥ अपूपा भक्तिरस्य आपूपिकः। पायसिकः॥ अचित्तात् किं। देवदत्तः॥ अदेशात् किं। स्रौघ्नः॥

कं १

ता २

मल्ला भल्लकिनः। शाट्यायनी। शाट्यायनिनः। कल्पे पिंगाद्। पैंगी। कल्पः। पुराणेति किं। याज्ञवल्क्यानि ब्रा
ह्मणानि। आश्मरथः कल्पः। अणि। आपत्यस्येति य लोपः। कठचरकाल्लुक्। आभ्यां प्रोक्तप्रत्यय
स्य लुक् स्यात्। कठेन प्रोक्तमधीते कठाः। चरकाः। कलापिनोऽण्। कलापिना प्रोक्तमधीते कालापाः।
नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलाङ्गलिलाङ्गलिशिलालि
शिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानमित्युपसंख्यानाट्टिलोपः। छगलिनो ढिनुक्। छाग
लिना प्रोक्तमधीते छागलेयिनः। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः। पाराशर्येण प्रोक्तं
भिक्षुसूत्रमधीते पाराशरिणो भिक्षवः। शैलालिनो नटाः। कर्मन्दकृशाश्वादिनिः। भिक्षुनट
सूत्रयोरित्येव। कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः। तेनैकदिक्। सुदा
म्ना अद्रिणा एकदिक् सौदामनी। तसिश्च। तसिप्रत्ययः स्यात्। पीलुमूलेन एकदिक् पीलु
मूलतः। उरसो यच्च। चात्तसिः। अणोऽपवादः। उरसा एकदिक् उरस्यः। उरस्तः। उपज्ञाते। तेनेत्ये
व। पाणिनिना उपज्ञातं पाणिनीयं। कृते ग्रन्थे। वररुचिना कृतो वाररुचो ग्रन्थः। संज्ञायां। तेनेत्येव।
अर्थयार्थमिदं। मक्षिकाभिः कृतं माक्षिकं मधु। कुलालादिभ्यो वुञ्। तेन कृते संज्ञायां। कुला

ठा७

लेन कृतं कौलालकं । वारुडकं । क्षुद्राभ्रमरवटरपादपादञ् । तेन कृते संज्ञायां । क्षुद्राभिः कृतं क्षौद्रं । भ्रा
मरं । वाटरं । पादपं । तस्येदं उपगोरिदं औपगवं । वहेस्तुरणिट् च । संवोढुः स्वं सांवहित्रं । आग्नीध्रः शार
णे रञ्भं च । अग्निमिंधे अग्नीत् तस्य स्थानं आग्नीध्रं । तादर्थ्ये सोऽप्याग्नीध्रः । समिधामाधाने षे
ण्यण् । सामिधेन्यो मंत्रः सामिधेनीकः । रथाद्यत् । रथ्यं चक्रं । पत्रपूर्वादञ् । पत्रं वाहनं । अश्व
रथस्येदं आश्वरथं । पत्राध्वर्युपरिषदश्च । अत्र पत्राद्वाह्ये । अश्वस्येदं वहनीयं आश्वं । आध्वर्यवं
पारिषदं । हलसीराट्ठक् । हालिकं । सैरिकं । द्वंद्वाद्वुन्वैरमैथुनिकयोः । काकोलूकिका । कुत्सकु
शिकिका । द्वंद्वे देवासुरादिभ्यः प्रतिषेधः । दैवासुरं । गोत्रचरणाद्वुञ् । औपगवकं । चरणाद्धर्माम्नाय
योरिति वक्तव्यं । काठकं । संघांकलक्षणेष्वञ्यञिञामण् । घोषग्रहणमपि कर्तव्यं । अत्र वैदः संघो
ऽङ्को घोषो वा । वैदं लक्षणं । यञ् । गार्ग्यः गार्गी इञ् । दाक्षः । दाक्षं । परंपरासंबंधे वुक । सा सा तुलक्षणं
शाकलाद्वा । अणोऽपवादः । पक्षे ऽरणञ्वाठञ् । शकलेन प्रोक्तमधीयते शाकलास्तेषां संघोऽङ्को घो
षो वा शाकलः शाकलकः । लक्षणे कु । बता । छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः । छंदोगा
नां धर्मो आम्नायो वा छांदोग्यं । औक्थिक्यं । याज्ञिक्यं । बाह्वृच्यं । नाट्यं । चरणाद्धर्माम्नाययोरि

(Left margin:) ति ५ ॥११५॥
(Right margin:) राग ६ ॥११५॥

स्य संमत साहवयर्म्नटशब्दादिपितयोरेवानदंडमाणवांतेवासिषु ठेर्दे प्रधाना माणवा दंडमाण

वास्तेषु शिष्येषु वुञ् न स्यात्॥ दाक्षाः दंडमाणवाः॥ शिष्या वा॥ रैवतिकादिभ्यश्छः॥ तस्येदमित्य

र्थे वुञोपवादः॥ रैवतिकीयः॥ बैजवापीयः॥ कौपिंजलहास्तिपदादण् वाच्यः॥ कुपिंजलस्यापत्यं

इहैव निपातनात् दृण्। तदंतात्सुन्रणण्। कौपिंजलः॥ गोत्रवुञोपवादः॥ हस्तिपदस्यापत्यं हास्तिप

दः॥ तस्यायं हास्तिपदः॥ चरणाद्वुञोपवादः॥ आथर्वणिकस्येकलोपश्च॥ अण् स्यात्॥ आथर्वणिक

स्यायं आथर्वणो धर्मः॥ आम्नायो वा चरणाद्वुञोपवादः॥ ७॥ समासाः शैषिकाः॥ ७॥ आरम्भ।

तस्य विकारः॥ अश्मनो विकारे टिलोपो वक्तव्यः॥ अश्मनो विकारः आश्मः॥ भास्मनः॥ मार्त्तिकः॥

अवयवे च प्राण्योषधिवृक्षेभ्यः॥ यादिकारो। मयूरस्यावयवो विकारो वा मायूरः॥ मौर्विकांडं

भस्म वा॥ पैप्पलं॥ बिल्वादिभ्योऽण्॥ बैल्वः॥ कोपधाच्च॥ अण्॥ अञोपवादः॥ तर्कु॥ तार्कवं॥ तैत्तिडीकं॥

त्रपुजतुनोः षुक्॥ आभ्यामण् स्यात् षुक्कारो गतयोः॥ त्रापुषं॥ जातुषं॥ ओरञ्॥ दैवदार

वं॥ अनुदात्तादेश्च॥ दाधित्थं॥ कापित्थं॥ पलाशादिभ्यो वा॥ पालाशं॥ कारीरं॥ शम्याः ष्लञ्॥ शामील

भस्म॥ षित्वान्ङीष्॥ शामीली स्रुक्॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ मरुतिमात्रान्मयट्

वास्य हिक्का। रावयवयोः। अश्ममयं। आश्मनं। अत्सेक्ष्यादिकिं। मौञ्जः। कपः। कार्पासमाच्छादनं। नित्यं वृद्ध
शरादिभ्यः। आम्रमयं। शरमयं। एकाचो नित्यं। वाङ्मयं। त्वङ्मयं। कथं तर्हि आप्यमन्नमयमिति। तस्येदमि
त्यणन्तात्स्वार्थे ष्यञ्। गोश्च पुरीषे। गोः पुरीषं गोमयं। पिष्टाच्च। मयट् स्यात्। पिष्टमयं भस्म। कथं
पैष्टी सुरेति सामान्यविवक्षायां तस्येदमित्यण्। संज्ञायां कन्। पिष्टादित्येव। पिष्टस्य विकारविशेषः
पिष्टकः अपूपोऽपूपः। पिष्टकः स्यात्। व्रीहेः पुरोडाशे। मयट् स्यात्। बिल्वाद्यणोपवादः। व्रीहिमयः पुरो
डाशः। व्रैहमन्यत्। असंज्ञायां तिलयवाभ्यां। तिलमयं। यवमयं। संज्ञायां तु तैलं। यावकः। तालादिभ्यो
ऽण्। अण्मयटोरपवादः। तालाद्धनुषि। तालं धनुः। अन्यत्तालमयं। ऐं रङ्कवं। जातरूपेभ्यः परिमाणे।
त्रणम्। बहुवचनात्स्वर्णपर्यायग्रहणं। हाटकः। तापनीयः। सौवर्णो वा निष्कः। परिमाणे किं। हाटकमयी यष्टिः।
प्राणिरजतादिभ्योऽञ्। शौकं। बाकं। राजतं। ञितश्च तत्प्रत्ययात्। ञिद्यो विकारावयवप्रत्ययस्त

॥११६॥ दं तादञ्स्यात्पयोरेवार्थे येऽ मयटोपवादः। शामील्यस्य भस्म शामीलं। दाधित्थं। ञितः किं। शैल्यम् ॥११६॥

पो। क्रीतवत्परिमाणात्। आगुतेष्ठं प्याद्रन्तक्रीतार्थे ये प्रत्ययाः येनोपाधिना परिमाणाद्विहितास्ते
तावेव विकारेऽतिदिश्यन्ते। त्रणा× जि× दीनामपवादः। निष्केण क्रीतं नैष्किकं। एवं नैष्कस्य विकारोपि

नैष्किकः ॥ शातस्य विकारः शात्यः शातिकः ॥ उष्ट्राद्वुञ् ॥ प्राण्यञोऽपवादः ॥ औष्ट्रकः ॥ उमोर्णयोर्वा ॥ औमं औ-
मकं ॥ और्णं और्णकं ॥ वुञ्भावे यथाक्रममणञौ ॥ एण्या ढञ् ॥ ऐणेयं ॥ एणस्य तु ऐणं ॥ गोपयसोर्यत् ॥
गव्यं पयस्यं ॥ द्रोश्च ॥ द्रुर्वृक्षः ॥ तस्य विकारोऽवयवो वा द्रव्यं ॥ माने वयः ॥ द्रोरित्येव ॥ द्रुवयं ॥ पौतवं द्रुवयं पा-
य्यमिति नामार्थकं त्रयं ॥ फले लुक् ॥ विकारावयवप्रत्ययस्य लुक् स्यात् फले ॥ आमलक्याः फलं आम-
लकं ॥ प्लक्षादिभ्योऽण् ॥ विधानसामर्थ्यान्न लुक् ॥ प्लाक्षं ॥ न्यग्रोधस्य च केवलस्य ॥ आगमन वृ-
ऐजागमश्च ॥ नैयग्रोधं ॥ जंबा वा ॥ जंबूशब्दात् फलेऽण् वा स्यात् ॥ जांबवं ॥ पक्षे ओरञ् ॥ तस्य लुक् ॥ जंबु ॥
वा जंबाः फलप्रत्ययस्य लुब्वा स्यात् ॥ लुपि युक्तवत् ॥ जंबाः फलं ॥ जंबूः ॥ फलपाकशुषामुपसंख्या-
नं ॥ व्रीहयः मुद्गाः ॥ पुष्पमूलेषु बहुलं ॥ मल्लिकायाः पुष्पं मल्लिका ॥ जात्याः पुष्पं जाती ॥ विदार्याः मूलं वि-
दारी ॥ बहुलग्रहणान्नेह ॥ पाटलानि पुष्पाणि ॥ साल्वानि मूलानि ॥ बाहुलकात् क्वचिल्लुक् ॥ अशोकं
करवीरं ॥ हरीतक्यादिभ्यश्च ॥ एभ्यः फलप्रत्ययस्य लुप् स्यात् ॥ हरीतक्यादीनां लिंगमेव प्रकृतिवत् ॥
हरीतक्याः फलानि हरीतक्यः ॥ कंसीयपरशव्ययोर्यञञौ लुक् च ॥ कंसीयपरशव्यशब्दाभ्यां यञञौ
स्तः छयतोश्च लुक् ॥ कंसाय हितं कंसीयं ॥ तस्य विकारः कांस्यं ॥ परशवे हितं परशव्यं ॥ तस्य पारशवः

तै१

॥आग्रीव्यतीयाः समाप्ताः॥ प्राग्वहतेष्ठक्॥ तद्वहतीत्यतः प्राक् ठगधिक्रियते॥ तदाहेति माशब्दादिभ्य
उपसंख्यानम्॥ माशब्दः कारि इति य आह स माशब्दिकः॥ स्वागतादीनां च॥ ऐज् न स्यात्॥ स्वागतमित्या
ह स्वागतिकः॥ स्वाध्वरिकः॥ स्वङ्गस्यापत्यं स्वाङ्गिः॥ व्याङ्गिः॥ व्यडस्यापत्यं व्याडिः॥ व्यवहारेण चरति
व्यावहारिकः॥ स्वपतौ साधु स्वापतेयम्॥ आहौ प्रभूतादिभ्यः॥ प्रभूतमाह प्राभूतिकः॥ पार्याप्तिकः॥
पृच्छतौ सुस्नातादिभ्यः॥ सुस्नातं पृच्छति सौस्नातिकः॥ सौखशायनिकः॥ अनुशतिकादिः॥ गच्छतौ प
रदारादिभ्यः॥ पारदारिकः॥ गौरुतल्पिकः॥ तेन दीव्यति खनति जयति जितम्॥ अक्षैर्दीव्यतीत्याक्षि
कः॥ अभ्र्या खनतीत्याभ्रिकः॥ अक्षैर्जयतीत्याक्षिकः॥ अक्षैर्जितमाक्षिकम्॥ संस्कृतम्॥ दध्ना संस्कृतं
दाधिकम्॥ मारिचिकम्॥ कुलत्थकोपधादण्॥ ठकोऽपवादः॥ कुलत्थैः संस्कृतं कौलत्थम्॥ तैत्तिडीकम्॥ तरति॥
उडुपेन तरतीत्यौडुपिकः॥ गोपुच्छाट्ठञ्॥ गौपुच्छिकः॥ नौद्व्यचष्ठन्॥ नाविकः॥ घटिकः॥ बाहुभ्यां तरति
बाहुकः॥ चरति॥ तृतीयान्ताच्चरतीत्यर्थे ठक् स्यात्॥ हस्तिना चरति हास्तिकः॥ शाकटिकः॥
दध्ना चरति दाधिकः॥ आकर्षात्ष्ठल्॥ आकर्षो निकषोपलः॥ आकर्षादिति पाठान्तरम्॥ तेन चरति आक
र्षिकः॥ षित्वात् ङीष्॥ आकर्षिकी॥ पर्पादिभ्यः ष्ठन्॥ पर्पेण चरति पर्पिकः॥ पर्पिकी॥ पेन पादेन पङ्गुश्च

रंतिसपर्प्यः॥ ऋश्चिकः। राश्चिकः॥ श्वगणाट्ठञ्च॥ यास्थन्न्। श्वादेरिञि॥ ऐयूव॥ श्वस्त्रस्यापत्यं श्वाप
स्तिः। श्वादंष्ट्रिः॥ द्वारादिषु श्वन्शब्दः पठ्यते तत्र तदादिविधेर्वै तदेव स्यापकं इकारादाविति वाच्यं।
श्वगणेन चरति श्वागणिकः। श्वागणिकी॥ श्वगणिकः। श्वगणिकी॥ पदांतस्यान्यतरस्यां॥ श्वादेर
गस्य पदशब्दांतस्येञ्च। श्वापदस्येदं श्वापदं। शौवापदं॥ वेतनादिभ्यो जीवति॥ वेतनेन जीवति वैतनि
कः। धानुष्कः॥ वस्नक्रयविक्रयाट्ठन्। वस्नेन मूल्येन जीवति वास्निकः॥ क्रयविक्रयग्रहणं संघातवि
गृहीतार्थं। क्रयविक्रयिकः। क्रायिकः। विक्रयिकः॥ आयुधाच्छ च॥ याट्ठक्। आयुधेन जीवति आयुधीयः।
आयुधिकः॥ हरत्युत्संगादिभ्यः॥ उत्संगेन हरति औत्संगिकः॥ भस्त्रादिभ्यः ष्ठन्॥ भस्त्रया हरति भस्त्रिकः। भ
स्त्रिकी॥ वैवधिकः॥ एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन्। वीवधिकः। वीवधिकी॥ विवधवी
वधशब्दो ऽत्र पर्यायो शिक्ये स्कंधवाह्ये काष्ठे वर्त्तेते। अण् कुटिलिकायाः॥ कुटिलिका व्याधानां गति
विशेषः कर्मारोपकरणं च लोहं च। कुटिलिकया हरति मृगान् अंगारान्वा कौटिलिको व्याधः। क
र्मारश्च॥ निर्वृत्तेऽक्षद्यूतादिभ्यः॥ अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरं॥ त्रेर्मम्नित्यं॥ त्रिप्रत्ययांतप्रक्र
ति कात्रीयो नाम्नि वृत्तेर्नित्यं मप् स्यान्नित्यं। कृत्यानि वृत्तं कृत्रिमं। पक्त्रिमं। भावप्रत्ययांतादिमब्वक्तव्यः।

६४

विपाणविपयात्

।।११८।।

पाकेन निर्वृत्तं पाकिमं। त्यागिमं। अपमित्ययाचिताभ्यां कक्कनौ। अपमित्येति ल्यबन्तं। अपमित्य नि
र्वृत्तमापमित्यकं। याचितेन निर्वृत्तं याचितकं। संसृष्टे। दध्ना संसृष्टं दाधिकं। चूर्णादिनिः। चूर्णैः संसृ
ष्टाः चूर्णिनोऽपूपाः। लवणाल्लुक्। लवणेन संसृष्टो लवणः सूपः। लवणं शाकं। मुद्गादण्। मौद्ग ओद
नः। व्यञ्जनैरुपसिक्ते। दध्ना उपसिक्तं दाधिकं। ओजःसहोम्भसा वर्तते। औजसिकः शूरः। साहसिकश्
चौरः। आम्भसिको मत्स्यः। तत्प्रत्यनुपूर्वमीपलोमकूलं। द्वितीयान्तादस्माद् वर्तते इत्यस्मिन्नर्थे ठ
क् स्यात्। क्रियाविशेषणत्वाद् द्वितीया। प्रतीपं वर्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलो
मिकः। प्रातिकूलिकः। आनुकूलिकः। परिमुखं च। परिमुखं वर्तते पारिमुखिकः। चात् पारिपार्श्वि
कः। प्रयच्छति गर्ह्यं। द्विगुणार्थं द्विगुणं तत् प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। वृद्धेर्वृधुषिभावो वाच्यः।
वार्धुषिकः। कुसीददशैकादशात् ष्ठन्ष्ठचौ। गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः। प्रयच्छति गर्ह्यं कुसीदं वृद्धिस्त
दर्थं द्रव्यं कुसीदं तत्प्रयच्छति कुसीदिकः। कुसीदिकी। एकादशार्थत्वाद् [illegible]
रायेति विग्रहे ऽकारः समासान्त इहैव सूत्रे निपात्यते। दशैकादशिकः। दशैकादशिकी। दशैकादशा
न् प्रयच्छति। उत्तमर्णे एवेहापि तद्धितार्थः। [illegible] प्रयच्छति वा दशैकादशिकः। रक्षति। समाजं रक्षति

।।११८।।

157

सामाजिकः॥ शब्दं दर्दुरं करोति॥ शाब्दिकः॥ दार्दुरिकः॥ पक्षिमत्स्यमृगान् हंति॥ स्वरूप
स्वपर्यायाणां विशेषाणां च ग्रहणं॥ मत्स्यपर्यायेषु मीनस्यैव॥ पक्षिणो हंति पाक्षिकः॥ शाकुनि
कः॥ मायूरिकः॥ मात्स्यिकः॥ मैनिकः॥ शाकुलिकः॥ मार्गिकः॥ हारिणिकः॥ सारंगिकः॥ परिपंथं च ति
ष्ठति॥ अस्माद् द्वितीयांतात्तिष्ठति हंति चेत्यर्थे ठक् स्यात्॥ पंथानं वर्जयित्वा व्याप्य वा तिष्ठति पारिप
थिकश्चोरः॥ परिपंथं हंति पारिपंथिकः॥ माथोत्तरपदपदव्यनुपदं धावति॥ दंडाकारो माथः पंथाः
दंडमाथः दंडमाथं धावति दांडमाथिकः॥ पादविकः॥ आनुपदिकः॥ आक्रंदाट्ठञ्च॥ अस्माट्ठञ् स्याच्चा
त् ठक् धावतीत्यर्थे॥ आक्रंदं दुःखिनां रोदनस्थानं धावति आक्रंदिकः॥ पदोत्तरपदं गृह्णाति॥ सर्वपदा
द् गृह्णाति पौर्वपदिकः॥ औत्तरपदिकः॥ प्रतिकंठार्थललामं च॥ एभ्यो गृह्णात्यर्थे ठक्॥ प्रतिकंठं गृह्णाति
प्रातिकंठिकः॥ आर्थिकः॥ लालामिकः॥ धर्मं चरति धार्मिकः॥ अधर्माच्चेति वक्तव्यं॥ आधर्मिकः॥ प्रतिप
थमेति ठंश्च॥ प्रतिपथमेति प्रातिपथिकः॥ समवायान् समवैति सामवायिकः॥ सामाजिकः॥ पारिषदः॥
परिषदं समवैति पारिषद्यः॥ सेनाया वा॥ ण्यः स्यात् पक्षे ठक्॥ सैन्याः॥ सैनिकाः॥ संज्ञायां ललाटकुक्कु
ट्योः पश्यति॥ ललाटं पश्यति लालाटिकः सेवकः॥ कुक्कुटीशब्देन तत्संबंधी स्वल्पदेशो लक्ष्यते कौक्कुटि

॥११२॥

कः ॥ हिक्कु ॥ तस्य धर्म्यं ॥ आपणस्य धर्म्यं ॥ आपणिकं ॥ अण् महिष्यादिभ्यः ॥ महिष्या धर्म्यं माहिषं ॥ याज
मानं ॥ ऋतोऽञ् ॥ पातुर्धर्म्यं पात्रं ॥ नराच्चेति वक्तव्यं ॥ नरस्य धर्म्यं नारं ॥ विशसितुरिड्लोपश्चाञ्च वक्तव्यः
विशसितुर्धर्म्यं वैशस्त्रं ॥ विभाजयितुर्णिलोपश्चाञ्च वक्तव्यः ॥ विभाजयितुर्धर्म्यं वैभाजित्रं ॥ अव
क्रयः ॥ षष्ठ्यन्ताद्धर्म्यादवक्रयेऽर्थे ॥ आपणस्यावक्रयः आपणिकः ॥ राज्ञे यद्देयं सोऽवक्रय इति तद
स्य पण्यं ॥ अपूपाः पण्यमस्य आपूपिकः ॥ लवणाट्ठञ् ॥ लावणिकः ॥ किसरादिभ्यः ष्ठन् ॥ किसरं प
ण्यमस्य किसरिकः ॥ षित्त्वान्ङीष् ॥ किसरिकी ॥ किसर उशीर नलद इत्यादि ॥ किसरादयः सर्वे सुग
न्धिद्रव्यविशेषवाचिनः ॥ शलालुनोऽन्यतरस्यां ॥ ष्ठन् पक्षे ठक् ॥ शलालुकः ॥ शलालुकी ॥ शलालु सु
गन्धिद्रव्यविशेषः ॥ शिल्पं ॥ मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः ॥ मड्डुकझर्झरादणन्यतरस्यां ॥ मड्डु
कवादनं शिल्पमस्य माड्डुकः ॥ माड्डुकिकः ॥ झार्झरः ॥ झार्झरिकः ॥ प्रहरणं ॥ तदस्येत्येव ॥ असिः प्रहरण
मस्य आसिकः ॥ धानुष्कः ॥ परश्वधाट्ठञ्च ॥ पारश्वधिकः ॥ शक्तियष्ट्योरीकक् ॥ शाक्तीकः ॥ याष्टीकः ॥
अस्तिनास्तिदिष्टं मतिः ॥ तदस्येत्येव ॥ अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः ॥ नास्तीति मतिर्यस्य
स नास्तिकः ॥ दिष्टमिति मतिर्यस्य स दैष्टिकः ॥ शीलं ॥ अपूपभक्षणं शीलमस्य आपूपिकः ॥ छत्रा

शालालुकः ॥ शालालुकी ॥ ६

॥११२॥

कार्मस्ताच्छील्ये। कार्म इति ताच्छील्ये णिटिलोपो निपात्यते। कर्मशीलः कार्मः। न तद्धित इत्येव सिद्धे णकार्यं ताच्छीलिके णेपि तेन चौरी तापसी च्यादि सिद्धं। ताच्छील्ये किं। कार्मणः।

द्विष्येयाणः। गुरोर्देवानामावराणां छात्रं तद्वशीलमस्य छात्रः। कर्माध्ययने वृत्तं। प्रथमांतात्सप्तम्यर्थे
ठक् स्यादध्ययने वृत्ता या क्रिया सा चेत्प्रथमांतस्यार्थः। ऐकान्यिकः। यस्याध्ययने प्रवृत्तस्य परी
क्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः। बह्वच्पूर्वपदाट्ठच्। प्राग्विषये। द्वादशान्यानि
कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः। द्वादशपाठ्यस्य जाता इत्यर्थः। हितं भक्षाः। अस्मै पथ्य
क्षणं हितमस्य आपूपिकः। तदस्मै दीयते नियुक्तं। अग्रभोजनं नियतं दीयतेऽस्मै आग्रभोजनिकः। श्रा
णामांसौदनाट्टिठन्। श्राणा नियुक्तं दीयतेऽस्मै श्राणिकः। श्राणिकी। मांसौदनग्रहणं संघातविग
हीतार्थं। मांसौदनिकः। मांसिकः। औदनिकः। भक्तादणन्यतरस्यां। पक्षे ठक्। भक्तमस्मै नियुक्तं दी
यते भाक्तः। भाक्तिकः। तत्र नियुक्तः। आकरे नियुक्तः आकरिकः। अगारांताट्ठन्। देवागारे नियुक्तो दे
वागारिकः। अध्यायिन्यदेशकालात्। निषिद्धदेशकालवाचिकात् ठक् स्यात् अध्यायिनि। श्मशाने अधी
ते श्माशानिकः। चतुर्दश्यामधीते चातुर्दशिकः। कठिनांतप्रस्तारसंस्थानेषु व्यवहरति। तत्रेत्येव।
वंशकठिने व्यवहरति वांशकठिनिकः। वेणुवृणकः कठिना यस्मिन् देशे स वंशकठिनः। तस्मिन्दे
शे या क्रिया परम्परसुबेया तां तथैवानुतिष्ठतीत्यर्थः। प्रास्तारिकः। सांस्थानिकः। निकटे वसति। नैक

तू ४ श्रे ३

कटिको लिस्रु॥ आवसथात् ष्ठल्॥ आवसथे वसति आवसथिकः॥ षित्वात् ङीष्॥ आवसथिकी॥ आक
र्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च॥ आवसथात्किसरादेः षितः षडेते ठगधिकारे॥ षडिति सूत्र
षट्केन विहिता इत्यर्थः॥ अथ पशुप्रसङ्गः॥ छ॥ गोविधिः समाप्तः॥ छ॥ आग्नि ताघत्॥ तद्वहति रथयुगप्रासङ्गं॥
आकृष्य दीर्घिक्रियातौ इति रथयुगप्रासङ्गं॥ रथं वहति रथ्यः॥ युग्यः॥ वत्सानां दमनकाले स्कंधे का
ष्ठमासज्यते स प्रासंगः॥ तं वहतीति प्रासंग्यः॥ धुरो यड्ढकौ॥ हलि चेति दीर्घप्राप्तौ॥ न लकुधुरः॥ अस्य
कुर्धुरोरिति उपधाया दीर्घो न स्यात्॥ धुर्यः॥ धौरेयः॥ खः सर्वधुरात्॥ सर्वधुरां वहति सर्वधुरीणः॥ एकधु
राल्लुक् च॥ एकधुरीणः॥ एकधुरः॥ शकटादण्॥ शकटं वहतीति शाकटो गौः॥ हलसीराट्ठक्॥ हलं वहतीति हा
लिकः॥ सैरिकः॥ संज्ञायां जन्या॥ जनीं वधूं ततो वहति प्रापयतीति जन्या॥ विध्यत्यधनुषा॥ द्वितीयान्ताद्विध्य
तीत्यर्थे यत् स्यात् न चेत्तत्र धनुः करणं॥ पादौ विध्यन्तीति पद्याः शर्कराः॥ धनगणं लब्धा॥ लब्धेत्येतस्मिन्नर्थे धने
लब्धा धन्यः॥ गणं लब्धा गण्यः॥ अन्नाण्णः॥ अन्नं लब्धा आन्नः॥ वशं गतः॥ वश्यः परेच्छानुचारी॥ पदमस्मि
न्दृश्यं॥ पद्यः॥ कर्दमः॥ नातिशुष्क इत्यर्थः॥ मूलमस्याबर्हि॥ आबर्हणमाबर्हः उत्पाटनं॥ तदस्यास्तीत्या
बर्हि॥ मूलमाबर्हि येषां ते मूल्या मुद्गाः॥ संज्ञायां धेनुष्या॥ धेनुशब्दस्य षुगागमो यत्प्रत्ययश्च स्वा

थे॥ निपात्यते संज्ञायां॥ धेनुष्या बंधके स्थिता॥ गृहपतिना संयुक्ते ञ्यः॥ गृहपतिर्यजमानस्तेन संयुक्तो गा
र्हपत्यो ग्निः॥ नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसं
मितेषु॥ नावा तार्यं नाव्यं॥ वयसा तुल्यो वयस्यः॥ धर्मेण प्राप्यं धर्म्यं॥ विषेण वध्यो विष्यः॥ मूलेन
आनाम्यं मूल्यं॥ मूलेन समो मूल्यः॥ सीतया समितं सीत्यं क्षेत्रं॥ तुलया संमितं तुल्यं॥ धर्मपथ्यर्थ
न्यायादनपेते॥ धर्मादनपेतं धर्म्यं॥ पथ्यं॥ अर्थ्यं॥ न्याय्यं॥ छंदसो निर्मिते॥ छंदसा निर्मितं छंदस्य
इच्छया कृतमित्यर्थः॥ उरसोण् च॥ चाद्यत्॥ उरसा निर्मितः पुत्रः औरसः॥ उरस्यः॥ हृदयस्य प्रिये हृ
द्यो देशः॥ हृदयस्य हृल्लेखयदण्लासेषु॥ हृदादेशः॥ बंधने चर्षौ॥ हृदयस्य शब्दात्सप्तम्यंताद्बंधने य
त्स्याद्वेदविषये॥ हृदयस्य बंधनो हृद्यः॥ वशीकरणमंत्रः॥ मतजनहलात्करणजल्पकर्षेषु॥ मतं ज्ञा
नं तस्य करणं साधकः साधनं वा मत्यं॥ जनस्य जल्पो जन्यः॥ हलस्य कर्षो हल्यः॥ तत्र साधुः॥ अग्र्यः॥ सा
मसु साधुः सामन्यः॥ ये चाभावकर्मणोरिति प्रकृतिभावः॥ कर्मण्यः॥ शरण्यः॥ प्रतिजनादिभ्यः ख
ञ्॥ प्रतिजने साधुः प्रातिजनीनः॥ सांयुगीनः॥ सार्वजनीनः॥ वैश्वजनीनः॥ भक्ताण्णः॥ भक्ते साधवो
भाक्ताः शालयः॥ परिषदो ण्यः॥ पारिषद्यः॥ परिषद इति योगविभागाण्णो पि॥ पारिषदः॥ कथादिभ्य

ष्कू। कथायां साधुः कार्थिकः ॥ गुडादिभ्यष्ठञ् ॥ गुडे साधुर्गौडिकः इक्षुः ॥ सक्तुके यवः ॥ पथ्यतिथिव
सतिस्वपतेर्ढञ् ॥ पथि साधु पाथेयं ॥ आतिथेयः ॥ वसतेव सतिः ॥ तत्र साधुर्वासतेयी रात्रिः ॥ स्वापते
यं धनं ॥ सभाया यः ॥ सभ्यः ॥ समानतीर्थे वासी ॥ साधुरिति निवृत्तं ॥ वसतीति वासी समाने तीर्थे गु
रौ वसतीति सतीर्थ्यः ॥ समानोदरे शयित ओ चोदात्तः ॥ समाने उदरे शयितः स्थितः समानोदर्यो भ्रा
ता ॥ सोदराद्यः ॥ सोदर्यः ॥ अर्थ प्राग्वतः ॥ ७ ॥ इति प्राग्घितीयाः ॥ ७ ॥ प्राक्क्रीताच्छः ॥ तेन क्रीतमित्य
तः प्राक् छोऽधिक्रियते ॥ उगवादिभ्यो यत् ॥ प्राक्क्रीतादित्येव ॥ उवर्णान्ताद्गवादिभ्यश्च यत्स्यात् ॥ छस्याप
वादः ॥ नाभि नभं च ॥ नभ्योऽक्षः ॥ नभ्यमञ्जनं ॥ रथनाभावेवेदं ॥ शुनः संप्रसारणं वा च दीर्घत्वं ॥ शुन्यं शुव्य शुन्यं
सोऽनडुहः ॥ खलु धन्यः ॥ कंबलाच्च संज्ञायां ॥ यत्स्यात् ॥ कंबल्यमूर्णापलशतं संज्ञायां किं ॥ कंबलीयमूर्णा ॥
विभाषा हविरपूपादिभ्यः ॥ आमिक्ष्यं दधि ॥ आमिक्षीयं ॥ पुरोडाश्याः तण्डुलाः ॥ पुरोडाशीयाः ॥ अपूप्यं ॥
॥१२१॥ अपूपीयं ॥ तस्मै हितं ॥ वत्सेभ्यो हितो वत्सीयो गोधुक् ॥ शंकव्यं दारु ॥ गव्यं ॥ हविष्यं ॥ शरीरावयवाद्यत् ॥ ॥१२१॥
दंत्यं कण्ठ्यं ॥ नस्यं नासिकायाय ... क्षुद्रेषु ॥ नस्यं नाभ्यं ॥ ये च तद्धिते ॥ पादोऽतद्धिते परे शिरः शब्दस्य शीर्ष
न्नादेशः स्यात् ॥ शीर्षण्यः ॥ तद्धिते किं ॥ शिरसः ॥ शिरस्यति ॥ वा केशेषु ॥ शीर्षण्याः ॥ शिरस्याः केशाः ॥

163

अपि शीर्षं इति वाच्यं। अजादेश आह्नं ते शिरसः शीर्षादेशः। स्थूलशिरस इदं स्थौलशीर्षं। खलयवमाषतिल
वृषब्राह्मणश्च। खलाय हितं खल्यं। यव्यं। माष्यं। वृष्यं। ब्रह्मण्यं। अजाविभ्यां थ्यन्। अजथ्या यूथिः।
अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात् खः। आत्माध्वानौ खे। एतौ खप्रत्यये प्रकृत्या स्तः। आत्मने हि
तम् आत्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद् बहुव्रीहेश्च छ एव। विश्वजनीयं। पंच
जनादुपसंख्यानं। पंचजनीनं। सर्वजनाट्ठञ् खश्च। सार्वजनिकः। सर्वजनीनः। महाजनाट्ठञ्। मा
हाजनिकः। मातृभोगीणः। पितृभोगीणः। राजभोगीनः। आचार्यादणत्वं च। आचार्यभोगीनः। स
र्वपुरुषाभ्यां णढञौ। सर्वाण्णो वेति वक्तव्यं। सर्वस्मै हितं सार्वं। सार्वीयं। पुरुषाड्ढञ्। वधविकारसमूहते २६
न कृतेषु। भाष्यकारप्रयोगात्। तेनेयस्य द्वहुमध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। तस्येदमित्यणि
प्राप्ते पुरुषस्य विकारः पौरुषेयः। प्राणिरजतादिभ्योऽञ् इत्यञि प्राप्ते। समूहे ऽणि प्राप्ते। एकाकिनो
ऽपि प्रभृतः पौरुषेयवृता इवेति माघः। तेन कृते ग्रन्थे ऽणि प्राप्ते अपौरुषेयं भासाहारो आम्नायाः
इति विवेकः। माणवचरकाभ्यां खञ्। माणवाय हितं माणवीनं। चारकीणं। तदर्थं विकृतेः प्रकृतौ।
विकृतिवाचकाच्चतुर्थ्यंतात्तदर्थायां प्रकृतौ वाच्यायां प्रत्ययः स्यात्। अंगारेभ्य एतानि अंगा

ता१

रा॥ याति॥ कांस्यानि॥ प्राक्क्रीताच्छः॥ शंकव्यं दारु॥ छदिरुपधिबलेर्ढञ्॥ छादिषेयाणि तृणानि॥
वालेयास्तंडुलाः॥ उपधिशब्दास्स्वार्थे इष्यते॥ उपधीयत इत्युपाधिः रथांगं॥ तेनैव औपधेयं॥ ऋ
षभोपानहोर्ञ्यः॥ छस्यापवादः॥ आर्षभ्यो वत्सः॥ औपानह्यो मुंजः॥ चर्मण्यप्येवमेव स्वं विप्रतिषेधेन॥ पप ३
औपानह्यं॥ चर्मणोऽञ्॥ चर्मणो या विकृतिस्तद्वाचकादञ् स्यात्॥ वाध्रं इदं वाध्रं चर्म॥ वारत्रं चर्म॥
तदस्य तदस्मिन्स्यादिति॥ प्राकारः आसामिष्टकानां स्यात् प्राकारीया इष्टकाः॥ प्रासादीयं दारु॥
प्राकारोऽस्मिन्स्यात् प्राकारीयो देशः॥ इतिशब्दो लौकिकीं विवक्षामनुसारयति॥ तेनेह न॥ प्रा
सादो देवदत्तस्य स्यादिति॥ परिखाया ढञ्॥ पारिखेयी भूमिः॥ छयतोः पूर्णोऽवधिः॥ प्राग्व
तेष्ठञ्॥ तेन तुल्यमिति ~~क्रिया चे~~ वक्ष्यति तत्र प्राक् ठञधिक्रियते॥ आर्हादगोपुच्छसंख्यापरि
॥१२२॥ माणाट्ठक्॥ तदर्हतीत्येतदभिव्याप्य ठञोऽधिकारे न्यिठञोपवादष्ठगिति क्रियते॥ गोपुच्छा ॥१२२॥
दीन्वर्जयित्वा॥ असमासे निष्कादिभ्यः॥ आर्हादित्येतचोनक्रान्तमिति पाठ सघदशात्व्या मनुष
तेति॥ निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थेषु॥ नैष्किकं॥ समासे तु परिमाणान्तस्यासंज्ञाशा
णयोः॥ उत्तरपदवृद्धिः स्यात्॥ जिदादौ परमनैष्किकं॥ असमासग्रहणं ज्ञापकं भवति तत्राप्रकृतरंत

ठञ्२

165

विधिरिति॥ तेन मुगव्ययपवाद्मण्णमित्यादि॥ इतऊर्द्धं तु संख्या॥ सर्वपदानां वदेन ग्रहणं प्राक्वतीति
रिष्यते॥ चालुकि॥ पारायणिकः॥ द्वैपारायणिकः॥ अलुकीति किं॥ द्वाभ्यां सूर्पाभ्यां क्रीतं द्विसूर्पं
द्विसूर्पेण क्रीतेन्नस्तर्पादञ्माभ्यत्त॥ किंतु अर्द्धिसौर्पिक॥ अर्द्धात्परिमाणस्यैतुवा॥ अर्द्धात्परिमाण
वाचकस्योत्तपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा ञ्णिति किति च॥ अर्द्धद्रोणेन क्रीतमर्द्धद्रौणिकं॥
आर्द्धद्रौणिकं॥ नातःपरस्य॥ अर्द्धात्परस्य परिमाणाकारस्य वृद्धिर्न पूर्वस्य तु वा ञिदादौ॥ अर्द्धप्र
स्थिकं॥ आर्द्धप्रस्थिकं॥ अतः किं॥ आर्द्धकौडविकं॥ तपरः किं॥ अर्द्धखार्यां भवा अर्द्धखारी॥ आर्द्धखा
री सार्यपीत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात्॥ शताच्च ठन्यतावशते॥ शतेन क्रीतं
शतिकं॥ शत्यं॥ अशते किं॥ शतं परिमाणमस्य शतकः संघः॥ इह अयथार्थविवक्षायां प्रकृत्यर्था
न्नातिरिच्यते तेन ठन्यतौ न किंतु कन्नेव॥ असमास इत्येव॥ द्विशतेन क्रीतं द्विशतिकं॥ संख्याया
अतिशदन्तायाः कन्॥ संख्यायाः कन्स्यात् [illegible]॥ पंचभिः क्रीतः पंचकः॥ ब
हुकः॥ त्यन्तायास्तु॥ साप्ततिकः॥ शदन्तायाः चत्वारिंशत्कः॥ वतोरिड्वा॥ वत्वंतात्कन इड्वा स्यात्॥

६२

तावतिकः। तावकः। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्। योगविभागः कर्तव्यः। आभ्यां कन् स्यात्। असं
ज्ञायां ड्वुन् स्यात् कनोऽपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः। कंसाट्टिठन्। टो ङी
वर्थः। इकार उच्चारणार्थः। कंसिकः। कंसिकी। अर्धाच्चेति वक्तव्यम्। अर्धिकः। अर्धिकी। कार्षाप

शत४ णाट्टिठन् वक्तव्यः। प्रतिरादेशश्च वा। कार्षापणिकः। कार्षापणिकी। प्रतिकः। प्रतिकी। शूर्पादञन्यत
रस्याम्। शौर्पम्। शौर्पिकम्। शतमानविंशतिकसहस्रवसनादण्। एभ्योऽण् स्यात् ठञ्ठकोरपवा
दः। शतमानेन क्रीतं शातमानम्। वैंशतिकम्। साहस्रम्। वासनम्। अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्।
अध्यर्धपूर्वाद् द्विगोश्च परस्याऽऽर्हीयस्य लुक् स्यात्। अध्यर्धकंसम्। द्विकंसम्। संज्ञायां तु पाञ्चकपा

५प लिकम्। विभाषा कार्षापणसहस्राभ्याम्। लुग्वा स्यात्। अध्यर्धकार्षापणम्। अध्यर्धकार्षापणिकम्।
द्विकार्षापणम्। द्विकार्षापणिकम्। औपसंख्यानिकस्य टिठनो लुक्पक्षे। अध्यर्धप्रतिकम्। द्विप्रति
कम्। अध्यर्धसहस्रम्। अध्यर्धसाहस्रम्। द्विसहस्रम्। द्विसाहस्रम्। द्वित्रिपूर्वान्निष्कात्। लुग्वा स्यात्।
द्विनिष्कम्। द्विनैष्किकम्। त्रिनिष्कम्। त्रिनैष्किकम्। बहुपूर्वाच्चेति वक्तव्यम्। बहुनिष्कम्। बहुनैष्किकम्। बिस्ता

बहु१ च्च। द्वित्रिपूर्वाद् बिस्तादार्हीयस्य लुग्वा। द्विबिस्तम्। द्विबैस्तिकमित्यादि। विंशतिकात्खः। अध्य

र्द्धस्य द्विगोरित्येव। अध्यर्द्धविंशतिकीनं। द्विविंशतिकीनं। खार्या ईकन्। अध्यर्द्धखारीकं। द्विखारीकं। केवलायाश्चेति वक्तव्यं। खारीकं। पणपादमाषशताद्यत्। अध्यर्द्धपण्यं। द्विपण्यं। अध्यर्द्धपाद्यं। द्विपाद्यं। इह पादः पद्दिति न। यस्येति लोपस्य स्थानिवद्भावात्। पद्यत्यतदर्थे इत्यपि न। प्राण्यङ्गार्थस्यैव तत्र ग्रहणात्। शाणाद्वा। पक्षे ठञ्। तस्य लुक्। अध्यर्द्धशाण्यं। अध्यर्द्धशाणं। द्वित्रिपूर्वादण्च। शाणाद्वित्येव वाग्रत्। तेन त्रैरूप्यं। परिमाणान्तस्यासंज्ञाशाणयोरिति पर्युदासा दिह वृद्धिरेव। द्वैशाणं। द्विशाण्यं। द्विशाणं। इह ठञादयः त्रयोदश प्रत्ययाः प्रकृताः तेषां समर्थवि भक्तयोर्थश्चाकांक्षिताः ते इदानीमुच्यन्ते। तेन क्रीतं ठञ्। गोपुच्छेन क्रीतं गोपुच्छिकं। साप्ततिकं। प्रास्थिकं। ठञः नैष्किकं। इह गोप्यां हस्वान्तात्ठिति लुकि लुकोपवादः। पंचभिर्गोभिः क्रीतः पञ्चगुः। तस्य निमित्तं संयोगोत्पातौ। संयोगः संबंधः उत्पातः शुभाशुभसूचकं। शतिकः शतस्य धनपतिः संयोगः शत्यं शतिकं। दक्षिणाक्षिस्पन्दनं। शतस्य निमित्तमित्यर्थः। वातपित्तश्लेष्मणः शमनकोपनयोरुपसंख्यानं। वातस्य शमनं कोपनं वा वातिकं। पैत्तिकं। श्लैष्मिकं। सन्निपाताच्चेति वक्तव्यं। सान्निपातिकं। गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्। गोर्निमित्तं संयोग उत्पा

ति ५

शत्यः४

तोगव्यः॥ ध्रुवः॥ धन्यः॥ यशस्यः॥ स्वर्ग्यः॥ गोध्रुवस्कि॥ वितयस्य वैतपिकः॥ असंख्येयादिस्कि॥ पंचानां पंचकं
आस्थिकं॥ स्वाकं॥ अध्याय॥ आधिकं॥ आश्विमकं॥ अन्यवर्गसादुपसंख्यानं॥ अन्यवर्गस्य॥ पुत्राच्छचा॥ याश्च
तः॥ पुत्रीयः॥ पुत्र्य॥ सर्वभूमिपृथिवीभ्यामणञौ॥ सर्वभूमेर्निमित्तं संयोगो सम्भोवा सार्वभौमः॥ पार्थिवः॥
सर्वभूमिशब्दोनुशतिकादिषु पठ्यते॥ तस्येश्वरः॥ तत्र विदित इति च॥ सर्वभूमेरीश्वरः सर्वभूमौ विदितो
वा सार्वभौमः॥ पार्थिवः॥ सर्वलोक सर्वलोकः॥ ठञ्॥ तत्र विदितइत्यर्थे॥ लौकिकः॥ अनुशतिकादित्वादुभ
सार्वलौकिकः॥ पपदवृद्धिः॥ तस्य वापः॥ उप्यते अस्मिन्निति वापः क्षेत्रं॥ प्रस्थस्य वापः प्रास्थिकं॥ द्रौणिकं॥ कौडिकं॥ पात्रात्ष्ठन्॥
स्य पात्रं वापः पात्रिकं॥ पात्रिकाक्षेत्रं पक्तिः॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते॥ वृद्धिर्दीयतइत्यादि
कर्मेण प्रत्येकं संबंधादेकवचनं॥ पंचास्मिन्वृद्धिः आयः लाभः शुल्कं उपदा वा दीयते पंचकः॥ शतिकः॥ शत्यः
साहस्रः॥ उत्तमर्णेनाधमर्णात्तिरिक्तं यद्गृह्यते सा वृद्धिः॥ ग्रामादिषु स्वामिग्राह्यो भाग आयः॥ विक्रेता द्रव्यस्य मूल्या
मूल्यादधिकं ग्राह्यं लाभः॥ रक्षानिर्वेशो राजभागः शुल्कः॥ उत्कोच उपदा॥ चतुर्थ्यर्थ उपसंख्यानं॥ पंचा
स्मै वृद्ध्यादि दीयते पंचको देवदत्तः॥ समं ब्राह्मणे दानमिति सिद्धे वृद्धिकरणाविवक्षार्थं॥ हरणादिवृद्ध्यादिप
प्रयोगमतरहितो अपवादः॥ द्वितीयो वृद्ध्यादिरस्मिन्दीयते द्वितीयकः॥ त्रितीयिकः॥ आर्द्धिकः॥ आर्द्ध

॥१२४॥

म२ या२

गोः संतपत्यादिषु र्थेषु लुक्खौ चास्तः॥ वात् स्य स्य॥ लुगभावे छन्दः प्रवाणां द्विकुलिजः॥ द्विकुलिजीना॥
द्विकुलिजिकी॥ द्वैकुलिजिकी॥ सोऽस्यांशवस्नभृतयः॥ अंशो भागः॥ वस्नं मूल्यं॥ भृतिर्वेतनं॥ पंचस्त्र
शो वस्नो भृतिर्वास्य पंचकः॥ तदस्य परिमाणं॥ प्रस्थं परिमाणमस्य प्रास्थिको राशिः॥ संख्यायाः संज्ञा
संघसूत्राध्ययनेषु॥ पूर्वसूत्रमनुवर्त्तते। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः॥ यदाद्ये कपोरीतिवत् संख्यामा
त्र वृत्तेः परिमाणिनि प्रत्ययः॥ पंचैव पंचकाः शकुनयः॥ पंच परिमाणमेषामिति वा॥ संघे पंचकः स्तैत्रो॥ अष्ट
कं पाणिनीयं॥ संघशब्दस्य प्राणिसमूहे रूढत्वात् सूत्रे ग्रहणमुपात्तं॥ पंचकमध्ययनं॥ स्तोमे डविधिः॥ पंच
दशा मन्त्राः॥ परिमाणमस्य पंचदशः॥ सप्तदशः॥ एकविंशः॥ सोमपानेषु स्तोमः॥ क्रियमाणः अष्टादि सं
कारकनिस्तोमः॥ पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं॥ एते रूढशब्दा निपा
त्यन्ते॥ पंचद्दशतौ वर्गे वा॥ पंच परिमाणमस्य पंचद्वर्गः॥ दशत् पक्षे पंचकः दशकः॥ त्रिंशच्चत्वारिंशतोर्ब्राह्म रा ४
णे संज्ञायां डण्॥ त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां॥ त्रैंशानि चात्वारिंशानि॥ तदर्हति॥ लब्धुं योग्यो भवतीति नि३
इत्यर्थे॥ द्वितीयान्तात् ठञादयः स्युः॥ श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः॥ छेदादिभ्यो नित्यं॥ नित्यं मर्हति॥ छेदं नि
त्यमर्हति छैदिकः॥ वैनसिकः॥ छिन्नोऽर्हति॥ विरागविरंगं च॥ विरागं नित्यमर्हति वैरंगिकः॥ आर्षच्छेदा

ग वर्गः॥

शब्दो रूपकस्यार्द्धस्तदः। भागाद्यच्च। याद्भुत्र। भागशब्दोपि रूपकस्यार्द्धे। भागो वृद्ध्यादिरस्मिन् सा
गिकः। भाग्यः। भाग्यं शतं। भागिकं। भाग्या भागिकी विंशतिः। तद्धरति वहत्यावहति भाराद्वंशादिभ्यः
वंशादिभ्यः परो यो भारशब्दस्तदंतं यत्प्रातिपदिकं तस्मात्प्रकृतिकाद्धितायां तादिष्वर्थेः। वंशभारं वहति
हरति आवहति वा वांशभारिकः। ऐक्षुभारिकः। भाराद्वंशादिभ्य इत्यस्य व्याख्यांतरं। भारभूतेभ्यो वं
शादिभ्य इति। भारभूतान्वंशान्हरति वांशिकः। ऐक्षुकः। वस्नद्रव्याभ्यां ठन्कनौ। यथासंख्यं प्रत्ययौ। वस्नं

द्रव्यकः

हरति वहति आवहति वा वास्निकः। संभवत्यवहरति पचति। प्रस्थं संभवति प्रास्थिकः कटाहः। प्रस्थस्य
तस्मिन्समावेशो यत इत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमुपसंहरति पचति वेत्यर्थः। तत्सवतो ति। द्रोणाद्
ण्वा। याङ्भुत्र। द्रोणं पचति द्रौणी। द्रौणिकः। आढकाचितपात्रात् खोऽन्यतरस्यां। पक्षे ठञ्। आढकं संभवति
अवहरति पचति वा। आढकीनः। आढकिकः। आचितीनः। आचितिकः। पात्रीणः। पात्रिकः। द्विगोष्ठंश्च।
आढकाचितपात्रादित्येव। आढकाद्यंताद्द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् खो वा स्यात्। पक्षे ठञ्। तस्याध्यर्द्धे
ति लुक्। षित्वान्ङीप्। द्व्याढकिकी। द्व्याढकीना। द्विगोरिति ङीप्। द्व्याढकी। द्व्याचितिकी। द्व्याचितीना। अप
रिमाणेति ङीन्निषेधः। द्व्याचिता। द्व्यापात्रिकी। द्विपात्रीणा। द्विपात्री। कुलिजाल्लुक्खौ च। कुलिजांताद्द्वि आ१

२१ यत्॥ शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शीर्षच्छेदिकः। यद्वृको संयोगेन शिरसः शीर्षभावो निपात्यते।
दंडादिभ्यः। एभ्यो यत्स्यात्। दंडमर्हति दंड्यः। अर्घ्यः। वध्यः। पात्राद्घंश्च। पात्रं घन्। तदर्हतीत्यर्थे। पात्रियः।
२२ पात्र्यः। कडंकरदक्षिणाच्छ च। चाद्यत्। कडंकरमर्हतीति विग्रहे। अत एव निपातनात्सवर्णः। कडंकरा माषमुद्गादि
काष्ठमर्हतीति कडंकरीयो गौः। कडंकर्यः। दक्षिणामर्हतीति दक्षिणीयः। दक्षिण्यः। स्थालीबिलात्। स्था
लीबिलमर्हतीति स्थालीबिलीयाः। स्थालीबिल्याः तण्डुलाः। पाकयोग्या इत्यर्थः। यज्ञर्त्विग्भ्यां घखञौ।
यथासंख्यं स्तः। यज्ञकर्मार्हति यज्ञियो देशः। आर्त्विजीनः। यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानं। यज्ञियो देशः। आर्त्विजीनो ब्राह्मणः॥ ॥ आर्हीयानां ठगादीनां द्वादशानामर्थविधिः। अतः परं ठञेव।
पारायणतुरायणचांद्रायणं वर्तयति। पारायणं वर्तयतीति पारायणिकश्छात्रः। तुरायणं यज्ञविशेषः। तं व
र्तयतीति तौरायणिको यजमानः। चांद्रायणिकः। संशयमापन्नः। संशयविषयोऽर्थः सांशयिकः। योज
नं गच्छति। योजनिकः। क्रोशशतयोजनशतयोरुपसंख्यानं। क्रोशशतं गच्छति क्रौशशतिकः। यौजनशति
कः। ततोऽभिगमनमर्हतीति च वक्तव्यं। क्रोशशतादभिगमनमर्हति क्रौशशतिको भिक्षुः। यौजनशति
क आचार्यः। पथः ष्कन्। षोडशार्थः। पंथानं गच्छति पथिकः। पथिकी स्त्री। पंथो ण नित्यं। पंथानं नित्यं गच्छति पांथः।

पांथ्या। उत्तरपथेनाहृतं च। उत्तरपथेन आहृतमौत्तरपथिकं। उत्तरपथेन गच्छत्यौत्तरपथिकः। आहृतप्रक
रणे वारिजंगलस्थलकांतारपूर्वादुपसंख्यानं। वारिपथिकं। काळात्। व्युष्टादिभ्योऽणिति यावत् आ प्रागधिका
रोयं। तेन निर्वृत्तं। आह्ना निर्वृत्तमाह्निकं। तमधीष्टो भृतो भूतो भावी। अधीष्टः सत्कृत्य व्यापारितः। भृतो
वेतनेन क्रीतः। भूतः स्वसत्तया व्याप्तः कालः। भावी तादृश एवानागतः। मासमधीष्टः मासिकोऽध्याप
कः। मासं भृतो मासिकः कर्मकरः। मासं भूतो मासिको व्याधिः। मासं भावी मासिक उत्सवः। मासाद्वय
सि यत्खञौ। मासं भूतो मास्यः। मासीनः। द्विगोर्यप्। मासाद्वयसि यत्खञावनुवर्तेते द्वौ मासौ भूतः द्विमास्यः। ष

प ण्मासाण्ण्यच्च। वयसि त्र्यमेवायमनुवर्तते। चात् ठञ्। षाण्मास्यः। षाण्मासिकः। अवयसि ठंश्च। वाण्यत्। ष
ण्मासिको व्याधिः। षाण्मास्यः। समायाः खः। समामधीष्टो भृतो भूतो भावी वा समीनः। द्विगोर्वा। समायाः
ख इत्येव। तेन परिजय्येत्याः आदिवृत्तादिषु पंचस्वर्थेषु अयं प्रत्ययः। द्विसमीनः। द्वैसमिकः। रात्र्यहःसंव

॥१५६॥ त्सराच्च। द्विगोरित्येव। द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। समासान्तविधेरनित्यत्वादटचू। द्विसं ॥१५६॥
वत्सरीणः। संख्यायाः संवत्सरसंख्यस्य च। संख्यापूर्वोत्तरपदस्य वृद्धिः स्याञ्जिदादौ। द्विसांवत्सरिकः।
द्विषष्टिर्गतो द्विषाष्टिकः। संख्यापरिमाणानां तस्यैव सिद्धे संवत्सरग्रहणं परिमाणग्रहणं कालप

षाः पण्मास्यः।

173

परिमाणं तस्य संभाव्यमानत्वात्। द्वैकुडविको ऽयो ज-नमस्य
आसंभविष्यतीति। आगतो नवभ्यो वर्षेभ्यो द्वैवार्षिकः ३ द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिक
द्विनैष्किकः। अत्र तेनेति कृतं क्रीतं वा परिमाणं तस्य

रिमाणग्रहणार्थं। तेन द्वैसमिकइत्यत्रापि पदवृद्धिर्न। वर्षाल्लुक्। वर्षशब्दात् द्विगोः परस्य ठञो वा
लुक्। यथासंख्यमिति। द्विवर्षीणो व्याधिः। द्विवर्षः। वर्षस्याभविष्यति। उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षि
कः। भविष्यतीति तु द्वैवार्षिकः। अत्र यद्यपि तयोरप्यभविष्यतीति प्रतिषेधो न गम्यते हि। तत्र भविष्यतीत्य
नाहितार्थे द्वे वर्षे अधीष्टो भृतो भूतो भावी वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। चित्तवति नित्यं। वर्षश
ब्दो नाद्विगोः प्रत्ययस्य नित्यं लुक् स्यात्। चेतनस्य चार्थे द्विवर्षो दारकः। षष्टिकाः षष्टिरात्रेण पच्यन्ते।
बहुवचनमतंत्रं। षष्टिको धान्यविशेषः। त्तीयान्तात् षष्टिरात्रशब्दलोपश्च निपात्यते। तेन परिक्रयणं
कार्यं सुकरं। मासेन परिक्रय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा मासिकं। त
दस्य ब्रह्मचर्यं। द्वितीयान्तात् कालवाचिनोऽस्य ब्रह्मचर्यं प्रत्ययः स्यात्। अत्र संप्रयोगे द्वितीया। मासे ब्रह्मच
र्यमस्य सः मासिको ब्रह्मचारी। अर्द्धमासिकः। यद्वा प्रथमान्तादस्येत्यर्थे प्रत्ययः। मासोऽस्येति मासिके
ब्रह्मचर्यं। महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानं। महानाम्नो नाम विदाम घवन्नित्याद्या ऋचः। तासां ब्रह्म
चर्यमस्य माहानाम्निकः। हरदत्तस्तु भस्याढे तद्धिते पुंवद्भावान्महानामिकइत्याह। चातुर्मास्यानां यो पेहं
नामत्रयाणां ब्रह्मचर्यं। चातुर्मास्येषु भवन्ति चातुर्मास्यानि यज्ञाः। अत्रापि चातुर्मास्येषु भवानि चातुर्मास्यानि। अत्रापि त

त्वान्ङ्गिप्रपौर्णमासी। आषाढी। तस्य दक्षिणा यज्ञाख्येभ्यः। द्वादशाहस्य दक्षिणा द्वादशाहिकी। आख्या
ग्रहणादकालेपि। आग्निष्टोमिकी। वाजपेयिकी। तत्र च दीयते कार्यं भववत्। प्रावृष एण्यः। प्रावृषि दीयते कार्यं वा प्रा
वृषेण्यः। शारदं॥ ४॥ कालाधिकारस्य समाप्तिः॥ व्युष्टादिभ्योऽण्। व्युष्टे दीयते कार्यं वा वैयुष्टं। व्युष्ट
तीर्थ संग्राम प्रवास इत्यादि। तेन यथाकथाचहस्ताभ्यां णयतौ। यथाकथाचेत्यव्ययसंघातात् हस्तेपा
त् हस्तशब्दाच्च यथासंख्यं णयतौ स्तः। ५ अर्थाभ्यां तु यथासंख्यं ये नेष्यते। यथाकथाच दीयते कार्यं
वा याथाकथाचं। अनादरेण देयं कार्यं वेत्यर्थः। हस्तेन दीयते कार्यं वा हस्त्यं। संपादिनि। तेन थेव। कर्णवे
ष्टकाभ्यां संपादिकर्णवेष्टकिकं मुखं। कर्णालंकाराभ्याम् अवश्यं शोभत इत्यर्थः। कर्मवेषाद्यत्। कर्मणा
संपादि कर्मण्यं शौर्यं। वेषेण संपादी वेष्यो नटः। वेषः कृत्रिमाकारः। तस्मै प्रभवति संतापादिभ्यः। सं
तापाय प्रभवति सांतापिकः। योगाद्यच्च। चाद्वञ्। योगाय प्रभवति योग्यः। यौगिकः। कर्मण उ
कञ्। कर्मणे प्रभवति कार्मुकं। समयस्तदस्य प्राप्तं। समयः प्राप्तोस्य सामायिकं। ऋतोरण्। ऋतुः प्राप्तो
स्य आर्तवं। कालाद्यत्। कालः प्राप्तोस्य काल्यं शीतं। प्रकृष्टे ठञ्। कालादित्येव। तदस्येति चास्ति। प्रकृष्टो दी
र्घः कालोस्येति कालिकं वैरं। प्रयोजनं। तदस्येत्येव। इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकं। प्रयोजनं फलं का

सांग्रामिकः।४ श्री ५

रणं वा। विशारदवाग्वादादण्मेधदंड्योः। आस्यामाणस्याप्रयोजैमिच्चर्येक्रमान्मेधदंड्योरर्थयोः। विशा
रदा प्रयोजनमस्य वैशारदो मेधः। आषाढो दंडः। चूडादिभ्य उपसंख्यानं। चौडं। श्राद्धं। आद्धं। अ
प्रवचनादिभ्यश्छः। अनुप्रवचनं प्रयोजनमस्य व्याकरणसमापनीयं अनुप्रवचनीयं। समापना
त्सपूर्वपदात्। व्याकरणसमापनं प्रयोजनमस्य व्याकरणसमापनीयं। ऐकागारिकट् चौरे। ए
कमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः। आकालिकडाद्यंतवचने। स
मानकालवाद्यंतौ यस्य आकालिकः समानकालस्याकालः आदेशः। आशुविनाशीत्यर्थः।
पूर्वदिवसे मध्यान्हादुत्पद्य दिनांतरे तत्रैव नश्यति इति वा। आकालिकः। आकालिका विद्युत्
॥ ॥ ठञ्छणोर्विधिः॥ ॥ तेन तुल्यं क्रिया चेद्वतिः। ब्राह्मणेन तुल्यं ब्राह्मणवदधीते। क्रिया चेत् किं। गुण
तुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः। तत्र तस्येव। मथुरायामिव मथुरावत्। स्रुघ्ने प्राकारः। चैत्रस्ये
व चैत्रवन्मैत्रस्य। गावः। तदर्हं। विधिमर्हति विधिवत्पूज्यते। क्रियाग्रहणं मंडूकप्लुत्या अनुवर्तते।
तेनेह न। राजानमर्हति छत्रं। तस्य भावस्त्वतलौ। प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वं।
गोता। त्वांतं क्लीबं। तलंतं स्त्रियां। आ च त्वात्। ब्रह्मण त्वस्यतः प्राक् त्वतलावपि क्रियेते। अपवादै

नप

स्यह समावेशाद्गुणवचन। दिभ्यः कर्मणि च। विधानार्थं चेदं। ... जूरूपामपि समावेशार्थं
त्वियाभावः स्त्रैणं। स्त्रीत्वं। स्त्रीता। आ पौंस्नं। पुंस्त्वं। पुंस्ता। ... सुरूपादनुरस्य गतलवणा
वटपुष्पकतरत्स्लसेष्य। इतः परं पे... अयथा। तान्त ... पुरुषान्त स्पृष्ट्वगुणसन्च ... पेत्वा। आ
पतित्वे। आपटुत्व। नमू इत्र ... वाहस्य च। ... पुरुषा कि। नास्यपटवः ... तिश्च पटुता स्याभाव
आपटत्वे। अवहरोति कि। औदत्पौ। आलंगेचं। आलेवणं। औवटस्य। आयुष्यं। आकद्यं। आ
रस्यं। आलस्यं। इत्यादिष्ववहृत्या। बाबचनमणादिसमावेशार्थं। ... हलादेर्लघोः इष्ट
मेयस्पृधातर ... टेः लोपः स्यादिष्टमेयस्सु। इत्यार्थिका कृष्णा। पृथिमा। पार्थिवं। म्रदिमा। मार्दवं। कुण
इदं रिष्यः प्रत्यक्षा। चारिमनिम्नौ। शौक्ल्यं। शुक्लिमा। दार्ढ्यं। दृढिमा। इत्युच्चदुष्टः। कृशादृदुदपरि दानामेव
रत्वं। द्रढिमा। बोधवर्य। औचिती। पाथाकामी। गुणवचनब्राह्मणादिभ्यः कर्मणि च। चाद्भावे।
जडस्य कर्म भावो वा जाड्यं। मौदयं। ब्राह्मण्यं। आर्हतेभ्यश्च। आर्हतोऽस्य कर्मवा आर्हंत्यं। आर्हती। ॥१२८॥
ब्राह्मणादिराकृतिगणः। पथान्तयथा पुरयोः पर्यायेण। ... परयोरेत्पोः ... पर्यायोः प
पर्यायेणादेरयोर्वृद्धिर्जिदाद्वै। अपथान्तया भावः आपथात्यं। अपाथातर्थ्यं। आपयापुर्यं। अ

मा॰ थ्याधुर्यं । आपादसमाप्तेः कर्माधिकारः । चतुर्वर्णादीनां स्वार्थे उपसंख्यानं । चत्वारो वर्णाः चातुर्वर्ण्यं । चा-
तुराश्रम्यं । त्रैस्वर्यं । षाड्गुण्यं । सैन्यं । सान्निध्यं । सामीप्यं । औपम्यं । त्रैलोक्यं । इत्यादि । सर्ववेदाः सर्ववेदः तान-
धीते सर्ववेदः । सर्वादेरिति लुक् । स एव सार्ववैद्यः । चतुर्वेदस्याप्युपपदद्वयवृद्धिश्च । चतुर्वेदानधीते चतुर्वेदः । स एव चा-
तुर्वैद्यः । चतुर्वैद्यस्येति पाठांतरे । चतुर्विद्य एव चातुर्वैद्यः । स्तेनाद्यन्नलोपश्च । नेति संघातग्रहणं । स्तेनं करोतीति स्तेनयति । स्तेयं ।
पचाद्यच् । स्तेनस्य भावः कर्म वा स्तेयं । स्तेनादिति योगो विभज्यते अन्यामितिएवं तमपि केचिदिच्छन्ति । स-
ख्युर्यः । ५ । सख्युर्भावः कर्म वा सख्यं । दूतवणिग्भ्यां च । दूतस्य भावः कर्म वा दूत्यं । वाणिज्यं । इति काशिका । मा-
धवस्तु वाणिज्यमाह । दूतस्य भावो दौत्यमिति । भाव एवानुकर्मणीत्याह । आर्हे तु वणिग्भ्यां चेति नास्त्येव । दूत
ब्राह्मणादित्वात् वाणिज्यम् । अपि कपिज्ञात्योर्ढक् । कापेयं । ज्ञातेयं । पत्यंतपुरोहितादिभ्यो यक् । सैनापत्यं । पौ-
रोहित्यं । राज्ञो से । राजशब्दोऽसमासे यक् । यच्छब्दः । राज्ञः कर्म भावो वा राज्यं । समासे तु ब्राह्मणा-
दित्वात् ष्यञ् । आधिराज्यं । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । प्राणभृज्जाति । आश्वं । औष्ट्रं ।
वयोवचने । कौमारं । कैशोरं । औद्गात्रं । औन्नेत्रं । सौष्टवं । दौष्टवं । हायनांतयुवादिभ्योऽण् । द्वैहायनं । त्रै-
हायनं । यौवनं । स्थाविरं । श्रोत्रियस्य यलोपश्च । श्रौत्रं । कुशलचपलनिपुणपिशुनकुतूहलक्षेत्रज्ञाः ।
युवादिषु ब्राह्मणादिषु च पठ्यंते । कौशलं । कौशल्यमित्यादि । इगंताच्च लघुपूर्वात् । शुचेर्भावः कर्म वा

वैशेषिकं भूने त्तविः मेनं। कथं काव्ये। कविशब्दस्य ब्राह्मणादित्वात्। योपधाद्गुरूपोत्तमाद्वुञ्। रामणीयकं।
आभिधानीयकं। सहायाद्वा। साहाय्यं। साहायकं। द्वन्द्वमनोज्ञादिभ्यश्च। शैष्योपाध्यायिका। मानोज्ञकं।
गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु। अत्याकारो धिक्कारः स एव। तदवेतः तो गोत्रचरणपा भाव कर्मणि
प्राप्तः। अवगतवान्वा। गार्गिकया श्लाघ्यते। गार्ग्यत्वेन विकत्थन इत्यर्थः। गार्गिकयात्याकुरुते। गा
र्ग्यत्वेन परानधिक्षिपतीत्यर्थः। बहुवचनात् गार्गिकामवेतः। गार्गित्वं प्राप्तोऽवगतवानिति वाऽर्थः। हो
त्राभ्यश्छः। होत्राशब्दः ऋत्विग्वाची स्त्रीलिंगः। बहुवचनाद्बहुविषयग्रहणं। अच्छावाकस्य भावः कर्म वाच्छ
च्छावाकीयं। मैत्रावरुणीयं। ब्रह्मणस्त्वः। होत्रावाचिनो ब्रह्मशब्दात्त्वः स्यात्। छस्यापवादः। ब्रह्मत्वं। नेति व
क्तव्यवचनं। तत्त्वोवाचनार्थो ब्राह्मणस्य पर्यायो ब्रह्मन्शब्दात्त्वतलौ। ब्रह्मत्वं। ब्रह्मता। ब्रह्मन्नोरथिकारः
समाप्तः। धान्यानां भवने क्षेत्रे खञ्। भवन्त्यस्मिन्निति भवनं मुद्गानां भवनं क्षेत्रं मौद्गीनं। व्रीहिशाल्योर्ढ
क्। ब्रैहेयं। शालेयं। यवयवकषष्टिकाद्यत्। यवनानां भवनं क्षेत्रं यव्यं यवक्यं। षष्टिक्यं। विभाषा तिलु
माषोमाभङ्गाणुभ्यः। यत् स्यात्। पक्षे खञ्। तिल्यं तैलीनं। माष्यं। माषीणं। उम्यं। औमीनं। भङ्ग्यं। भा
ङ्गीनं। अणव्यं। आणवीनं। सर्वचर्मणः कृतः खखञौ। आसमध्येपि निपातनात्समासः। सर्वचर्मणा
कृतः सर्वचर्मीणः सार्वचर्मीणः। यथामुखसंमुखस्य दर्शनः खः। मुखस्य सदृशं यथामुखं। प्रतिबिंबं नि

रव

पातना साहश्ये ऽ यथापीत्वा ॥ समं सर्वमुखं संमुखं । समशब्दस्यान्तलोपो निपात्यते । यथामुखं । दर्शनः
यथामुखीनः ॥ सर्वस्य मुखस्य दर्शनः संमुखीनः ॥ तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति । सर्वादेः पथ्या
द्यन्ताद्द्वितीयान्तात्खः स्यात् । सर्वपथान् व्याप्नोति सर्वपथीनः ॥ सर्वाङ्गीणः ॥ सर्वकर्मीणः ॥ सर्वपत्रीणः ॥
सर्वपात्रीणः ॥ आप्रपदं प्राप्नोति । पादस्याग्रं प्रपदं तन्मर्यादीकृत्य आप्रपदं । आप्रपदीनः पटः ॥ अनु
पदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु । अनुरायामे [illegible] सादृश्ये वा । अनुपदं बद्धा अनुपदीना उ
पानत् । सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः ॥ अयानयः नेयः [illegible] विशेषः । तस्मिन्नेयः अयानयीनः शारः ॥ प
रोवरपरंपरपुत्रपौत्रमनुभवति । परांश्च अवरांश्च अनुभवति परोवरीणः ॥ अवरस्योत्वं निपात्यते । परां
श्च परतरांश्च अनुभवति परंपरीणः ॥ परंपराभावो निपात्यते । पुत्रपौत्रानुभवति पुत्रपौत्रीणः
॥ परंपराशब्दस्तु अव्युत्पन्नं शब्दान्तरं स्त्रीलिङ्गं । अस्मादेव [illegible] पारंपर्यं । कथं परोवर्यविदिति
असाधुरेवायं । स्वार्थे ष्यञ्प्रत्यये परोवरेति निपातनात् ॥ अवारपारात्यन्तानुकामं गामी ॥ अवारपा
रगामी ॥ अवारपारीणः ॥ अवारीणः ॥ पारीणः ॥ पारावारीणः ॥ अत्यन्तं गामी अत्यन्तीनः ॥ भृशं गन्ता इत्यर्थः । अनु
कामं गामी । अनुकामीनः ॥ [illegible] समांसमां विजायते । यलोपो [illegible] सुप् [illegible] सर्वं पदं
निपात्यते । समांसमीना गौः ॥ समां समां [illegible] स्वार्थे च यथा [illegible] यलोपो वा वक्तव्यः

त्रि

समांसमीनां विजायते । समायां समायां वा ॥ अद्यश्वीना वडवा । अद्यश्वो वा विजायते । अद्यश्वीना वडवा ॥ आ

प्र २ सन्नं सवे च प्रयं ॥ के चित्तु त्याप तवृत्तिनानुवर्तयन्ति । अद्यश्वीनं मरणं । आसन्न मरणमित्यर्थः ॥ आगवी

नः ॥ आङ्पूर्वात् गोः कर्मण्यर्थे ख प्रत्ययो निपात्यते । गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः ॥ अनुग

वीनो गामी ॥ अनुगुः प गोः प[illegible]पृष्ठतः पर्याप्तं गच्छति अनुगवीनो गोपालः ॥ अध्वनो यत्खौ ॥ अध्वानमलं

गच्छति अध्वन्यः । अध्वनीनः । पन्था [illegible] विकमः गोः ॥ आमाध्वानो रवे इति प्रकृति ताव ॥ अभ्यमित्राच्छ च

या द्घ रवो ॥ अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः ॥ [illegible]मित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ॥ गोष्ठात् खञ्

तस्थितं गोष्ठो ... तत्पूर्वं गोष्ठीनो देशः ॥ अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ॥ एकाहे नाम्यूते ... एकाहगमः ॥ आश्वीनोऽध्वा

... नकौ पीने ... आष्टि ... कार्यपो ... शालात्रवे ... मर्हतीर ... लीनः ॥ अष्ट ... पपत्न नमर्हतीति कोपीनं ॥ पापं

तस्साधनमत्वात् ... कुपालिंगमपि तत्संबंधात् ... मपि ॥ यात्रा ... वति ॥ ... नमारारायासे

न जीवति न तु बुद्धिं वै भवेन सा । प्रा ... गीनः ॥ साप्तपदीनं सख्यं । सप्तभिः पदैरवाप्यते साप्तपदीनं ॥ हैयंगवीनं

||१३०|| संज्ञायां ॥ ह्योगोदोहस्य हियं गुरादेशः ॥ विकारार्थे खञ् निपात्यते । ह्यो दुह्यत इति दोहः क्षीरं । ह्योगोदोहस्य वि ||१३०||

कारो हैयंगवीनं नवनीतं ॥ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ पीलूनां पाकः पीलुकुणः । पी

लुकुणः ॥ कर्णमूलं कर्णजाहं ॥ पक्षात्तिः ॥ मूलग्रहणमात्रमनुवर्तते । पक्षस्य मूलं पक्षतिः । तेन वित्तश्चुं

कु १ स्प हं १

त्तुरवणपो॥ यकारः अर्थ्ये पो रा द्वो लुप्त निर्दिष्टः॥ तेन च सेनेत्संज्ञा॥ विद्यापारित्तेः विद्या चुंचुः विद्याचणः॥ विन
ञ्भ्यां नानाञौ नसह॥ असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ॥ विना॥ नाना॥ वेः शालच्छङ्कटचौ॥
क्रियाविशिष्टसाधनवाचकात्स्वार्थे॥ विशालः॥ विशङ्कटः॥ संप्रोदश्च कटच्॥ संकटः॥ प्रकटः॥ उत्क
टः॥ विकटः॥ अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम्॥ अलाबूनां रजः अलाबूकटं॥ तिलक
टं॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः॥ गवां स्थानं गोगोष्ठं॥ अश्वगोष्ठं॥ संघाते कटच्॥ अवीनां गो
संघातो ऽविकटः॥ विस्तारे पटच्॥ अविपटः॥ द्वित्वे गोयुगच्॥ उष्ट्रगोयुगं॥ षट्त्वे षड्गव
च्॥ अश्वषड्गवं॥ स्नेहे तैलच्॥ तिलतैलं॥ सर्षपतैलं॥ भवने क्षेत्रे शाकटशाकिनौ॥ इक्षुशाकटं॥ इक्षुशा शा
किनं॥ अवात्कुटारच्च॥ अवकुटारः॥ अवाचीनः अवकुटारः॥ अवकटः॥ नते नासिकायाः संज्ञायां
टीटञ्नाटज्भ्राटचः॥ अवादेश्चैव॥ नतं नमनं॥ नासिकाया नतं॥ अवटीटं॥ अवनाटं॥ अवभ्र
टं॥ तद्योगान्नासिका अवटीटा॥ पुरुषो अवटीटः॥ नेर्बिडज्बिरीसचौ॥ निबिडं निबिरीसं॥ इन
च्पिटच्चिकचि च॥ निरित्येव॥ नासिकाया नते॥ आभ्यां ये इनच्पिटचौ प्रत्ययौ॥ प्रकृतेश्चिकचि
इत्यादेशौ वा केऽप्यय चिकादेशो वक्तव्यः॥ चिकिनं चिपिटं॥ चिक्कं॥ क्लिन्नस्य चिल्पिल् लश्चास्य
चक्षुषी॥ क्लिन्ने चक्षुषी अस्य स चिल्लः पिल्लः चुल्लश्च चुल्लः॥ उपाधिभ्यां त्यकन्नासन्नारूढयोः॥

संज्ञायामित्यनुवर्त्तते। पर्वतस्यासन्नं स्थलं उपत्यका। आरूढं स्थलं अधित्यका। कर्म्मणि घटो
ठच्। घटत इति घटः। पचाद्यच्। कर्म्मणि घटते कर्म्मठः पुरुषः। तदस्य संजातं तारकादिभ्य इत
च्। तारकाः संजाता अस्य तारकितं नभः। आकृतिगणोऽयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। तद
स्येत्यनुवर्त्तते। ऊरुः प्रमाणमस्य ऊरुद्वयसं। ऊरुदघ्नं। ऊरुमात्रं। प्रमाणे लः। शमः दिष्टिः वितस्तिः
द्विगोर्नित्यं। द्वौ शमौ प्रमाणमस्य द्विशमं। प्रमाणपरिमाणाभ्यां संख्यायाश्च संशये मा
त्रज्वक्तव्यः। शममात्रं। प्रस्थमात्रं। पंचमात्राः। वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ। तावदेव तावद्द्वय
सं। तावन्मात्रं। पुरुषहस्तिभ्यामण् च। पुरुषः प्रमाणमस्य पौरुषं। पुरुषद्वयसं। यत्तदेतेभ्यः परि
माणे वतुप्। किमः संख्यापरिमाणे डति च। वा [illegible] प्रत्ययस्य घस्यात्। का संख्या
एषां ते कति। क्रियन्ते। संख्याया अवयवे तयप्। पंच अवयवा अस्य पंचतयं। द्वित्रिभ्यां तयस्या
यज्वा। द्वयं। द्वितयं। त्रयं। त्रितयं। उभादुदात्तो नित्यं। उभशब्दात्तयपोऽयच्स्यात् स चाद्युदात्तः। उभ
यं। तदस्मिन्नधिकमिति दशान्ताड्डः। एकादश अधिका अस्मिन् एकादशं शतसहस्रयोरेवेष्य
ते नेह। एकादश अधिका अस्यां विंशत्यां। प्रकृतिप्रत्ययार्थयोः समानजातीयत्वे एवेष्यते नेह ए
कादश माषा अधिका अस्मिन् सुवर्णशते। शदन्तविंशतेश्च। [illegible] त्रिंशदधिका अस्मि
[illegible] परिमाणमस्य [illegible]। किमिदंभ्यां वो घः। आभ्यां वतुप्स्याद्वस्य च घः। कियान्। इयान्। ६

183

५२

नृत्रिंशश्चत्वारिंशद्विंशत्यां संख्यायां। गुणस्य निगमाने मयट्। भागस्य मूल्ये क्रीमानात्... थमान्ता संख्या वाच्येष्वर्थे
मयट् स्यात्। यवानां द्वौ भागौ गुणस्य निमानमस्योदश्वितः द्विमयमुदश्वित् यवानां। गुणस्येति किं। द्वौ ब्रीहि
यवौ निमानमस्योदश्वितः। निमाने किं। द्वौ गुणौ क्षीरस्यैकस्तैलस्य द्विगुणं तैलं पच्यते क्षीरेण। तस्य पूरणे डट्।
एकादशानां पूरणः एकादशः। नान्तादेः संख्यादेर्मट्। डट्यमडागमो वा स्यात्। पञ्चानां पूरणः पञ्चमः। नान्तादि किं
विंशः। असंख्यादेः किं। एकादशः। षट्कतिकतिपयचतुरां थुक्। एषां थुगागमः स्यात् डटि। षण्णां पू
रणः षष्ठः। कतिथः। कतिपयशब्दस्यासंख्यात्वेऽपि तत एव ज्ञापकाद्डट्। कतिपयथः। चतुर्थः। चतुरश्छयतौ
तावाद्यक्षरलोपश्च। तुरीयः तुर्यः। बहुपूगगणसंघस्य तिथुक्। डटि चैव। पूगसंघयोरसंख्यात्वेऽपि
तत एव डट्। बहुतिथः। ... यादिवतो रिथुक्। डटि चैव। यावतिथः। द्वेस्तीयः। डटोऽपवादः। द्वयोः पूरणो द्विती
यः। त्रेः संप्रसारणं च। तृतीयः। विंशत्यादिभ्यस्तमडन्यतरस्याम्। एभ्यो डटस्तमडागमो वा स्यात्। विंशतित
मः। विंशः। एकविंशतितमः। विंशः। एकविंशतितमः। एकविंशः। नित्यं शतादिमासार्धमाससंवत्सराच्च।
शतस्य पूरणः शततमः। एकशततमः। मासादेस्तु एव डट्। मासतमः। अर्धमासतमः। षष्ट्यादेश्चासंख्या
देः। षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। एकषष्टः। एकषष्टितमः। मतौ छः सूक्तसाम्नोः।
मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्तीति अच्छावाकीयं सूक्तं। वारवंतीयं साम। अध्यायानुवाकयो

प ८४

यो २

लुक्॥ मत्वर्थस्य वुञ्च्छस्य लुक् स्यात्॥ अत एव ज्ञापकात् ञ्यः विधानसामर्थ्यात् विकल्पेन लुक्॥ गर्दभाण्डाच्च ॥ गर्भाण्डाय॥ विमुक्तादिभ्योऽण्॥ मत्वर्थे अण् स्याद्ध्यायानुवाकयोः॥ विमुक्तशब्दोऽस्मिन्नस्तीति वैमुक्तः॥ देवासुर॥ गोषदादिभ्यो वुन्॥ मत्वर्थे अध्यायानुवाकयोः॥ गोषदकः॥ इषेत्वकः॥ तत्र कुशलः पथः॥ वुन् स्यात्॥ पथि कुशलः पथकः॥ आकर्षादिभ्यः कन्॥ आकर्षे कुशलः॥ आकर्षकः॥ आकर्षादिः॥ त्सरुकः सादि॥ तो मुख्यः पाठः॥ आकर्षो निकषः॥ धनहिरण्यात्कामे॥ कामः इच्छा॥ धनकामो धनकः॥ देवदत्तस्य हिरण्यकः॥ स्वाङ्गेभ्यः प्रसिते॥ केशेषु प्रसितः केशकः॥ तत्र च नापि तत्परः॥ उदराट्ठगाद्यूने॥ औदरिकः॥ अजिगीषोठ स्यात्॥ उपवादः॥ उदरे प्रसितः औदरिकः॥ आद्यूनेति किं॥ उदरकः॥ उदरपरिष्ठीना॥ शस्त्रसक्तड्यर्थे॥ सस्येन परिजातः॥ कन् स्यात् न तु ठक्॥ सस्याद् गुणवाचिन् तु धान्यवाचिनः॥ सस्यातिपा॥ गुणेन परिजातः सर्वतः सस्यकः साधुः॥ अंशं हारी॥ हारीत्यावश्यके णिनिः॥ अत एव तद्यो॥ ॥१३२॥ श्रोत्रियंश्छन्दोऽधीते॥ ब्राह्मणाश्यस्मिन् देशे स ब्राह्मणकः॥ अल्पमन्नमस्यां सा उष्णिका यवागूः॥ अन्नशब्दस्य उत्त॥ शीतोष्णाभ्यां कारिणि॥ शीतं करोति शीतकः॥ अलसः॥ उष्णं करोति उष्णकः॥ शीघ्रका॥ अधिकं॥ अध्यारूढस्याब्धायकन् उत्तरपदलोपश्च॥ अनुकाभिकाभीकः कमिता॥ अनुकामयते इत्यनुकः॥ ॥१३२॥

पार्श्विको दीर्घश्च ॥ अनुकामयते अनुकः ॥ अभिकामयते अभिकः ॥ अतीकः ॥ पार्श्वेनान्विच्छति ॥ अनृजुरुपा-
यः पार्श्वं तेनान्विच्छति पार्श्वकः ॥ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ॥ तीक्ष्ण उपायोऽयःशूलं तेना-
न्विच्छति आयःशूलिकः ॥ साहसिकः ॥ दण्डाजिनं दंभस्तेनान्विच्छति दाण्डाजिनिकः ॥ तावतिथं ग्रहणमिति
लुग्वा ॥ कन्स्यात्प्रत्ययस्य लुग्वा ॥ द्वितीयकं ग्रहणं देवदत्तस्य ॥ द्वितीयेन रूपेण ग्रहणमित्य-
र्थः ॥ तावतिथेन गृह्णातीति कन्लुक् च ॥ नित्यं लुक् ॥ षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः ॥ पंचकः ॥ स एषां
ग्रामणीः ॥ देवदत्तो मुख्यो येषां ते देवदत्तकाः ॥ त्वत्काः ॥ मत्काः ॥ शृंखलमस्य बंधनं करभे ॥ शृंखलकः करभः ॥
उत्क उन्मनाः ॥ उद्गतमनस्क [illegible] उत्कः ॥ कालप्रयोजनाद्रोगे ॥ कालवचना-
त्प्रयोजनवचनाच्च कन्स्याद्रोगे ॥ द्वितीयेऽह्नि भवो द्वितीयको ज्वरः ॥ प्रयोजनं कारणं रोगस्य फलं वा ॥ विषपु-
ष्पैर्जनितो विषपुष्पकः ॥ उष्णं कार्यमस्य उष्णकः ॥ रोगे किं ॥ द्वितीयो दिवसोऽस्य ॥ तस्मिन्नन्नं प्राये संज्ञा-
याम् ॥ प्रथमांतात्सप्तम्यर्थे कन्स्यात् ॥ यत्प्रथमांतमन्नं चेत्प्रायविषयं तन्न ॥ गुडापूपाः प्रायेणान्नमस्यां गुडा-
पूपिका ॥ पौर्णमासी ॥ वटकेभ्य इनिर्वक्तव्यः ॥ वटकिनी ॥ कुल्माषादञ् ॥ कुल्माषाः प्रायेणान्नमस्यां कौल्माषी ॥
श्रोत्रियंश्छन्दोऽधीते ॥ श्रोत्रियः ॥ वेत्यनुवृत्तेः छान्दसः ॥ श्राद्धमनेन भुक्तमिनिठनौ ॥ श्राद्धी ॥ श्राद्धिकः ॥ पूर्वादिनिः ॥ पूर्वं
कृतमनेन पूर्वी ॥ सपूर्वाच्च ॥ कृतपूर्वी ॥ इष्टादिभ्यश्च ॥ इष्टमनेन इष्टी ॥ अधीती ॥ छन्दसि परिपन्थिपरिपरि-

निह

स१

णो पर्यवस्थातरि। पर्यवस्थाता प्रतिपक्षः। पन्थडप्यो। लोके तु परिपंथिशब्दो ऽनन्याय्यः॥ अनुपद्यन्वेष्टा॥ अ
नुपदमन्वेष्टा अनुपदी। गवां॥ साक्षाद्द्रष्टरि संज्ञायां॥ साक्षाद्द्रष्टा साक्षी॥ क्षेत्रियच् परक्षेत्रे चिकि
त्स्यः॥ क्षेत्रियो व्याधिः। शरीरांतरे चिकित्स्यः॥ अप्रतीकार्य इत्यर्थः॥ इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिं
द्रजुष्टमिंद्रदत्तमिति वा॥ इंद्र आत्मा तस्य लिंगं करणेन कर्तुरनुमानात्॥ इति करणप्रकारार्थः॥ इंद्रेण दु
र्जयमिंद्रियं॥ तदस्यास्त्यस्मिन्निति मतुप्॥ गावो ऽस्यास्मिन्वा संति गोमान्॥ भूमनिंदाप्रशंसासु नित्ययोगे
ऽतिशायने। संबंधे ऽस्तिविवक्षायां सर्वत्र मतुपादयः॥ रसादिभ्यश्च॥ मतुप्॥ रसवान्॥ रूपवान्॥ अन्यमत्वर्थी
यनिरसार्थं वचनं॥ रस। रूप। वर्ण। गंध। स्पर्श। शब्द। स्नेह। गुणात्॥ एकाचः॥ स्ववान्॥ गुणग्रहणं रसादीनां वि
शेषणं। तसौ मत्वर्थे॥ तांतसांतौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये। सं वसोः संप्रसारणं। विदुष्मान्॥ गुणवचनेभ्यो म
तुपो लुगिष्टः॥ शुक्लो गुणो ऽस्यास्ति शुक्लः पटः॥ कृष्णः॥ मादुपधायाश्च मतोर्वो ऽयवादिभ्यः॥ मवर्णावर्णां
तान्मवर्णावर्णो। पधायाश्च यवादिवर्जितस्य परस्य मतोर्मस्य वः स्यात्॥ किंवान्॥ ज्ञानवान्॥ विद्यावान्॥ लक्ष्मी
वान्॥ यशस्वान्॥ भास्वान्॥ यवादेस्तु यवमान्॥ ऊर्मिमान्॥ झयः॥ झयंतान्मतोर्मस्य वः स्यात्॥ अपदंतत्वान्न
ग्रस्तं। विद्युत्वान्॥ संज्ञायां॥ मतोर्मस्य वः॥ अहीवती॥ मुनीवती॥ आसंदीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्
चर्मण्वती॥ एते षट् संज्ञायां निपात्यंते॥ आसनशब्दस्यासंदीभावः॥ आसंदीवान् ग्रामः॥ अन्यत्रासनवा

मा ग्रासिब्वाद्दीर्घः २

187

नू। आसन्दिवादेस्यासीत्तवाः। अष्ठीवानन्यत्र। चक्रशब्दस्य चक्रीभावः। चक्रीवान्नाम राजा। चक्रवानन्यत्र।
कक्ष्यायाः संप्रसारणं। कक्षीवान्नाम ऋषिः। कक्ष्यावानन्यत्र। लवणशब्दस्य रुमण्भावः। रुमण्वान्ना
म पर्वतः। लवणवानन्यत्र। चर्मणो नलोपो णत्वाभावो णत्वं च। चर्मण्वती नाम नदी। चर्मवत्यन्यत्र। उदन्वानु
दधौ च। उदकस्य उदन्भावो मतौ उदधौ संज्ञायां च। उदन्वान्समुद्रः। ऋषिश्च। राजन्वान्सौराज्ये। राज
न्वती भूः। राजवानन्यत्र। प्राणिस्थादातो लजन्यतरस्यां। चूडालः। प्राणिस्थात्किं। शिखावान्दीपः। आ
तः किं। हस्तवान्। प्राण्यंगादेव। नेह। मेधावान्। अन्यतरस्यांग्रहणं वासिद्धे अतो हस्तलौ चूडालो सीयादो स्व
रितो [illegible] नुदात्तोपदार्थे विभक्तिश्चरितत्वाय प्रार्थ्यकाराः। सिध्मादिभ्यश्च। लच् स्यात्। सिध्मलः। सिध्म
वान्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं न तु प्रत्ययविकल्पार्थं। तेनाकारांतेभ्य इनिठनौ न। वातदंत
बललललाटानामूङ् च। वातूलः। वत्सांसाभ्यां कामबले। आभ्यां लच् स्यात् यथासंख्यं कामवति बल
वति चार्थे। वत्सलः। अंसलः। फेनादिलच्च। चाल्लच्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फे
निलः। फेनलः। फेनवान्। लोमादिपामादिपिच्छादिभ्यः शनेलचः। लोमादिभ्यः शः। लोमशः। लोमवान्। रो
मशः। रोमवान्। पामादिभ्यो नः। पामनः। अंगात्कल्याणे। अंगना। लक्ष्म्या अच्च। लक्ष्मणः। विषुणोरीदु
त्तरपदलोपश्चाकृतसंधेः। विषुणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्। प्रज्ञाश्र

त२

न३ द्वार्वाक्येयोगः॥ आड्ढो व्याकरणं आड्ढः॥ आढ्कः॥ आर्की॥ ह्रतेश्चवार्ते शतपःसहस्राभ्यां विकिनी॥ विनाच्योरिक्ष मा२
रान्कोरेपि शिखाणार्थः॥ तपस्वी॥ सहस्वी॥ असंख्यश्छंदस्तात्स्वसिद्धे पुनर्वचनमणर्थविधार्थमिति॥ सहस्रात्तु
ठनोपिवाधनार्थः॥ अणेव॥ योगविते गच्छेर्यो॥ तापसः॥ साहस्रः॥ ज्योत्स्नादिभ्य उपसंख्यानं॥ ज्योत्स्नः॥
तामिस्रः॥ सिकताशर्कराभ्यां च॥ सैकतो घटः॥ शार्करः॥ देशे लुबिलचौ च॥ वा दण्॥ मतुप्च॥ सिकताः सं
त्यस्मिन्देशे सिकता॥ सिकतिलः॥ सैकतः॥ सिकतावान्॥ एवं शर्करा इत्यादि॥ दन्त उन्नत उरच्॥ उन्नता दन्ताः सं
त्यस्य दन्तुरः॥ ऊषसुषिमुष्कमधोरः॥ ऊषरः॥ सुषिरः॥ मुष्कोऽण्डः॥ मुष्करः॥ मधु माधुर्यं॥ मधुरः॥ रप्रकरणे
खमुखकुञ्जेभ्य उपसंख्यानं॥ खरः॥ मुखरः॥ कुञ्जो हस्तिहनुः॥ कुञ्जरः॥ नगपांसुपाण्डुभ्यश्च॥ नगरं॥ पांसुरः॥ पा
ण्डुरः॥ पांडरशब्दस्तु अप्यूसन्नाएगो॥ कच्छ्वा ह्रस्वत्वं च॥ कच्छुरः॥ द्युद्रुभ्यां मः॥ द्युमः॥ द्रुमः॥ केशाद्वोऽन्यतरस्यां॥
प्रकृतेनान्यतरस्यां ग्रहणेन मतुपि सिद्धे पुनर्ग्रहणमिनिठनोः समावेशार्थं॥ केशवः॥ केशी॥ केशिकः॥ के
॥१३४॥ शवान्॥ अन्येभ्योपि दृश्यन्ते॥ मणिवो नागविशेषः॥ हिरण्यवो निधिविशेषः॥ अर्णसो लोपश्च॥ अर्णवः॥
गाण्ड्यजगात्संज्ञायां॥ ह्रस्वदीर्घयोर्यणा तंत्रेणानिर्देशः॥ गांडिवं॥ गांडीवं॥ अर्जुनस्य धनुः॥ अजगवं पि ॥१३४॥
नाकः॥ कांडांडादीरन्नीरचौ॥ कांडीरः॥ आंडीरः॥ रजःकृष्यासुतिपरिषदो वलच्॥ रजस्वला॥ कृषीवलः॥

189

वलइति दीर्घः। आसुतीवलः। शौंडिकः। परिवहलः। पर्षदिति पाठांतरं। पर्षद्वलः। अन्येभ्योऽपि दृश्यते। भ्रा
तृवलः। पुत्रवलः। शत्रुवलः। वलच्यत्वसंज्ञायामित्यनुवृत्तेऽनेन दीर्घः। दंताशिखात्संज्ञायां। दंतावलो हस्ती।
शिखावलः केकी। ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। मत्वर्थे निपात्यं
ते। ज्योतिष उपधालोपो नप्रत्ययश्च। ज्योत्स्ना। तमस उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतंत्रं। तमिस्रं। शृंगादि
नच्। शृंगिणः। ऊर्जसो वलच्। तेन वाधा मा भूदिति विनिरपि। ऊर्जस्वी। ऊर्जस्वलः। ऊर्जसिगाग
मइति वृत्तिकारवचनात् ऊर्जस्वतीति प्रत्यक्षसुन्नतेनेवोपपत्तेः। गोशब्दान्मिनिः। गोमी। मलशब्दादिन
च्। मलिनः। ईमसेजेमसच्च। मलीमसः। अत इनिठनौ। दंडी। दंडिकः। व्रीह्यादिभ्यश्च। व्रीही। व्रीहिकः। न
च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते। किं तर्हि शिखामालासंज्ञादिभ्य इनिः। यवखदादिभ्य इ
कः। अन्येभ्य उभयं तुंदादिभ्य इलच्च। यादि इनिठनौ मतुप्च। तुंदिलः। तुंदी। तुंदिकः। तुंदवान्। उदर।
पिचंड। यववीहि। स्वांगाद्विवृद्धौ। कर्णिलः। कर्णवान्। कर्णी। कर्णिकः। एकगोपूर्वाट्ठञ् नित्यं। एक
शतमस्यास्ति। ऐकशतिकः। ऐकसहस्रिकः। गोशतिकः। गोसाहस्रिकः। शतसहस्रांताच्च निष्का
त्। निष्कात्परो यो शतसहस्रशब्दौ तदंतात्प्रातिपदिकाट्ठञ्स्यान्मत्वर्थे। नैष्कशतिकः। नैष्कसह
स्रिकः। रूपादाहतप्रशंसयोर्यप्। आहतं रूपमस्यास्तीति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्ति

रूप्योगोः ॥ आहतेनेति किं । रूपवान् । अन्येभ्योपि दृश्यते । हिम्याः पर्वताः । गुण्या ब्राह्मणाः । अस्माया
मेधास्रजो विनिः । यशस्वी ॥ यशस्वान् । मायावी ॥ व्रीह्यादिभ्यश्च । पाठाद्विनिठनौ । मायी ॥ मायिकः ॥ किंतव
कुः स्रग्वी ॥ आमयस्योपसंख्यानं दीर्घश्च । आमयावी ॥ शृंगवृंदाभ्यामारकन् । शृंगारकः । वृंदारकः ॥
फलबर्हाभ्यामिनच् । फलिनः । बर्हिणः ॥ हृदयाच्चालुरन्यतरस्यां ॥ हृदयालुः । हृदयी ॥ हृदयि
कः । हृदयवान् ॥ शीतोष्णतृप्रेभ्यस्तदसहने । शीतं न सहते शीतालुः । उष्णालुः । तृप्यते ये तृप्रालुः ।
तृप्रं पुरोडाशः । तन्न सहते तृप्रालुः ॥ लच् । प्रकृत्यन्तरमिति माधवः ॥ हिमाच्चेलुः । हिमं न सहते हिमेलुः ॥ ब
लाद्गुलः । बलं न सहते बलूलः ॥ वातात्समूहे च । वातं न सहते वातस्य समूहो वा वातूलः ॥ तप्पर्वमरुद्
पा६ भ्यां । पर्वतः । मरुत्तः ॥ गुणात्पुरुषस्य ॥ सिंहासदेत्वा ॥ गुणिनः ॥ अत्र छंदसीति केचिदनुवर्तयंति । सुत्त
वैतत् । अन्यथा हि अहं शुभमोरियेवैवाम् ॥ गुणिनः कुर्यात् ॥ वाचो ग्मिनिः । वाग्मी ॥ आलजाटचौ
बहुभाषिणि । कुत्सित इति वक्तव्यं । कुत्सितं बहु भाषते वाचालः । वाचाटः । यस्तु सम्यग्वदते तत्र हुव
वाग्मीत्येव । स्वामिन्नैश्वर्ये । ऐश्वर्यवाचकात् स्वशब्दान्मत्वर्थे आमिनच् । स्वामी ॥ अर्शआदिभ्योऽ
च् । अर्शांस्यस्य विद्यंते अर्शसः । आकृतिगणोयं । द्वंद्वोपतापगर्ह्यात् प्राणिस्थादिनिः । द्वंद्वी । कटकवलयि
नी । शंखनूपुरिणी । उपतापो रोगः । कुष्ठी । किलासी । गर्ह्यं निंद्यं । ककुदावर्ती । काकतालुकी । प्राणिस्थात्किं ।

२७

191

ए६ ए६

पुष्पफलवान् घटः। प्राण्यंगान्न। पाणिपादवती। अत इन्येव। चित्रकललाटिकावती। सिद्धे प्रत्यये पुन
र्वचनं ठनादि[illegible]दिबाधनार्थं। वातातिसाराभ्यां कुक्। वातकी। अतिसारकी। रोगे चायम
िष्यते। नेह। वातवती गुहा। पिशाचाच्च। पिशाचकी। वयसि पूरणात्। पूरणप्रत्ययान्तान्मत्वर्थे इनिः स्या
द्वयसि द्योत्ये। मासः संवत्सरो वा पंचमोऽस्यास्तीति पंचमी उष्ट्रः। ठनबाधनार्थमिदं। वयसि किं। पंचमको ग्रा
मः। सुखादिभ्यश्च। इनिर्मत्वर्थे। सुखी। दुःखी। मालाक्षेपे। माली। धर्मशीलवर्णान्ताच्च। धर्माद्यन्तादि
निर्मत्वर्थे। ब्राह्मणधर्मी। ब्राह्मणशीली। ब्राह्मणवर्णी। हस्ताज्जातौ। हस्ती। जातौ किं। हस्तवान् पुरुषः। वर्णा
द्ब्रह्मचारिणि। वर्णी। पुष्करादिभ्यो देशे। पुष्करिणी। पद्मिनी। देशे किं। पुष्करवान् हस्ती। बाहूरुपू
र्वपदाद्बलात्। बाहुबली। ऊरुबली। सर्वादेश्च। सर्वधनी। सर्वबीजी। अर्थाच्चासंनिहिते। अर्थी। असं
निहिते तु अर्थवान्। तदन्ताच्च। धान्यार्थी। हिरण्यार्थी। बलादिभ्यो मतुबन्यतरस्यां। बलवान्। बली। उत्सा
हवान्। उत्साही। संज्ञायां मन्माभ्यां। मन्नन्तान्मान्ताच्च निर्मत्वर्थे। प्रथिमिनी। दामिनी। होमिनी। सोमिनी।
पा। संज्ञायां किं। सोमवान्। कंशंभ्यां बभयुस्तितुतयसः। कंशमिति मान्तौ। कमित्युदकसुखयोः। शमिति सुखे। आ
भ्यां सप्त प्रत्ययाः स्युः। युस्यसोः सकारः पदत्वार्थः। कंबः। कम्भः। कंयुः। कन्तिः। कन्तुः। कंतः। कंयः। शंबः। शं
भः। शंयुः। शंतिः। शंतुः। शंतः। शंयः। अनुस्वारस्य ये वैकल्पिकः परसवर्णः। वकारयकारपरे स्यानुनासिकौ वयौ।

तुंदिवलिवटेभ्यः ॥ तुंद्रानास्ति तुंदिः ॥ मर्त्तुर्ल्योपधोयस्मिन्निति माधवः ॥ तुंडिभः ॥ वलिभः ॥ वटिभः ॥ पामादिभ्यो लि
नोऽपि ॥ अहंशुभमोर्युस् ॥ अहमिति मांतमव्ययमहंकारे ॥ शुभमिति शुभे ॥ अहंयुः ॥ अहंकारवान् ॥ शुभंयुः ॥ शु
भान्वितः ॥ इति मत्वर्थीयाः ॥ ॥ प्राग्दिशो विभक्तिः ॥ ॥ दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्ययाः विभक्ति
संज्ञाः स्युः ॥ अथ स्वार्थिकाः प्रत्ययाः ॥ समर्थानामिति प्रथमादिति वा निवृत्तं ॥ वेति त्वनुवर्तत एव ॥ किंसर्वना
मबहुभ्योऽद्व्यादिभ्यः ॥ किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते ॥ इदम इश् ॥ इदमः इश् प्राग्दिशीये परे ॥ ए
तेतौ रथोः ॥ इदमः शब्दस्य एत इत् इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे ॥ इशोऽपवादः ॥ एत
इत् ॥ योगविभागः कर्तव्यः ॥ एतद ॥ एतेतौ रथोः ॥ अनु ॥ एतदश्चेति वा ॥ अनेकाल्त्वात् सर्वादेशः ॥
न लोपः प्रातिपदिकांतस्य ॥ सर्वस्य सोऽन्यतरस्यां दि ॥ प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य
सो वा स्यात् ॥ पंचम्यास्तसिल् ॥ पंचम्यंतेभ्यः किमादिभ्यस्तसिल् स्यात् ॥ कु तिहोः ॥ किमः कुः स्यात्
तकारादौ हादौ च विभक्तौ परतः ॥ कुतः ॥ कस्मात् ॥ यतः ॥ ततः ॥ इतः ॥ अतः ॥ अमुतः ॥ बहुतः ॥ द्व्यादेर्न ॥ द्व्यादिभ्यस्तसिल् न स्यात् ॥
न स्यात् ॥ किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात् ॥ पर्यभिभ्यां च ॥ ... अर्थ विवक्षायां ... पर्य
भिभ्यां च ॥ आभ्यां तसिल् स्यात् ॥ सर्वोभयार्थाभ्यामेव ॥ परितः ॥ सर्वत इत्यर्थः ॥ अभितः ॥ उभयत इत्यर्थः ॥
सप्तम्यास्त्रल् ॥ कुत्र ॥ यत्र ॥ तत्र ॥ बहुत्र ॥ इदमो हः ॥ त्रलोऽपवादः ॥ इश् आदेशः ॥ इह ॥ किमोऽत् ॥ वा ग्रहणमपकृष्यते ॥

॥१३६॥

सप्तम्यंतात् किमो ह्वास्यात्।पक्षे त्रल्।क्वाति।किमः क्वेत्यादेशः स्यादिति।क्व।कुत्र।धाहश्छंदसि।कुह।स्थवकु
ह।तमुथुः।एतदस्त्रतसोस्त्रतसौ चानुदात्तौ।अन्वादेशविषये एतदो।अश्स्यात्स चानुदात्तस्त्रतसोः।पूर्वतो
चानुदात्तौ स्तः।एतस्मिन्ग्रामे सुखं वसामः।अथो अत्राधीमहे।अतो न गंतास्मः।इतराभ्योऽपि दृश्यंते।पंच
मीसप्तम्यतरविभक्त्यंतादपि तसिलादयो दृश्यंते।दृशिग्रहणाद्भवदादियोग एव।स भवान्।ततो भ
वान्।तत्र भवान्।तं भवंतं।ततो भवंतं।एवं दीर्घायुः।देवानांप्रियः।आयुष्मान्।सर्वैकान्यकिंयत्तदः काले दा।
सप्तम्यंतेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्।सर्वस्मिन्काले सदा।सर्वदा।एकदा।अन्यदा।कदा।यदा।तदा।इदमो र्हिल्।
काले किं।सर्वत्र देशे।इदमो र्हिल्।सप्तम्यंतात्काले इत्येव।हस्यापवादः।अस्मिन्काले एतर्हि।काले किं।इह
देशे।अधुना।इदमः सप्तम्यंतात् कालवाचिनः स्वार्थे धुनाप्रत्ययः स्यात्।इदंरूपस्येति लोपः।अधुना।दानीं
च।इदानीं।तदो दा च।तदा।तदानीं।तदो दावचनमनर्थकं विहितत्वात्।अनद्यतने र्हिलन्यतरस्यां।कर्हि।कदा।
यर्हि।यदा।तर्हि।तदा।एकस्मिन्काले एतर्हि।सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्यु
रितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः।एते निपात्यंते।समानस्य सभावो द्यश्चाहनि।समानेऽहनि सद्यः।पू
र्वपूर्वतरयोः परउदारौ च संवत्सरे।पूर्वस्मिन्वत्सरे परुत्।पूर्वतरे वत्सरे परारि।इदमः इश् समसण् प्रत्ययश्च
संवत्सरे।अस्मिन्संवत्सरे ऐषमः।परस्मादेद्यव्यहनि।परस्मिन्नहनि परेद्यवि।इदमोऽश् द्यश्।अस्मिन्न

घ१

हनि। अद्य। पूर्वादिभ्यो एद्युस्। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरन्हो
रुभयेद्युः। द्युश्चोभयाद्वक्तव्यः। उभयद्युः। प्रकारवचने थाल्। प्रकारवृत्तिभ्यः किमादिभ्यः थाल् स्यात्स्वार्थे।
तेन प्रकारेण तथा यथा। इदमस्थमुः। थालोपवादः। एतदोपि वाच्यः। अनेन एतेन वा प्रकारेण इत्थं। किम
श्च। केन प्रकारेण कथं। प्राग्दिशीयानां विभक्तिसंज्ञा गणोऽवधिः॥ दिक्शब्देभ्यः सप्तमीपंचमीप्रथ
माभ्यो दिग्देशकालेष्वस्तातिः। सप्तम्याद्यंतेभ्यो दिशिरूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिप्रत्य
यः स्यात्। पूर्वाधरावराणामसि पुरधवश्चैषां। एभ्योऽस्तात्यर्थे असिप्रत्ययः स्यात् तद्योगे चैषां क्रमात्
पुर अध अव इत्यादेशाः स्युः। अस्ताति च। अस्तातौ परे पूर्वादीनां पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा
वा दिक् पुरः पुरस्तात्। अधः। अधस्तात्। अवः। विभाषावरस्याः। अवरस्यास्तातौ परेऽवस्यादेशः स्यात्। अवस्तात्।
अवरस्तात्। एवं देशे काले च। दिशि रूढेभ्यः किं। ऐन्द्र्यां वसति। सप्तम्याद्यंतेभ्यः किं। पूर्वं ग्रामं गतः। दिग
दिवृत्तिभ्यः किं। पूर्वस्मिन् गुरौ वसति। अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते। दक्षिणोत्तराभ्यामत
सुच्। अस्तातेरपवादः। दक्षिणतः। उत्तरतः। विभाषापरावराभ्यां। परतः। अवरतः। पुरस्तात्। अवरस्तात्।
अञ्चेर्लुक्। अंचत्यं तात् दिक्शब्दादस्तातेर्लुक् स्यात्। लुक्तद्धितलुकि। प्राच्यां प्राच्याः प्राची वा दिक् प्रा
क्। उदक्। एवं देशे काले च। उपर्युपरिष्टात्। अस्ताति विषये ऊर्ध्वशब्दस्योपादेशः स्याद्रिल्रिष्टाति

लोपश्च प्रत्ययो। उपरि उपरिष्टाद्वसति आगतो रमणीयं वा। पश्चात्। अपरस्य पश्चभावः। आति श्च
प्रत्ययो ऽस्तातेर्विषये। अनायादक्षिणादाति। उत्तरात्। अधरात्। दक्षिणात्। एनबन्यतरस्यामदूरेऽपंच
म्याः। उत्तरादिभ्य एनप् स्यादवध्यवधिमतोः सामीप्ये पंचम्यंतं विना। उत्तरेण। अधरेण। दक्षिणेन।
पक्षे यथाप्राप्तं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनपमाहुः। पूर्वेण ग्रामं। अपरेण ग्रा
मं। दक्षिणादाच्। अस्तातेर्विषये। दक्षिणा वसति। अपंचम्या इत्येव। दक्षिणा आगतः। आहि च दूरे। दक्षि
णात् दूरे आहिः स्यादाच्। दक्षिणाहि। दक्षिणा। उत्तराच्च। उत्तराहि। उत्तरा। संख्याया विधार्थे धा।
क्रियाप्रकारे वर्त्तमानात् संख्याशब्दात् स्वार्थे धा स्यात्। चतुर्धा। पंचधा। अधिकरणविचाले च। द्रव्यस्य सं
ख्यान्तरापादने संख्याया धा स्यात्। एकं राशिं पंचधा कुरु। एकाद्धो ध्यमुञन्यतरस्यां। ऐकध्यं। एकधा।
द्वित्र्योश्च धमुञ्। आभ्यां धाप्रत्ययस्य धमुञ् वा स्यात्। द्वैधं। द्विधा। त्रैधं। त्रिधा। धमुञन्तात् स्वार्थे डदर्शनं। प
थि द्वैधानि। एधाच्च। द्वेधा। त्रेधा। याप्ये पाशप्। कुत्सितो भिषक् भिषक्पाशः। पूरणाद्भागे तीयादन्। द्वि
तीयो भागः द्वितीयः। स्वार्थे विशेषः। तीयादीकक् स्वार्थे वाच्यः। द्वैतीयीकः। द्वितीयः। तार्त्तीयीकः। तृतीयः
कः। न विद्यायाः। द्वितीया। तृतीया विद्येत्येव। प्रागेकादशभ्योऽछन्दसि। पूरणप्रत्ययान्ताद्भागेऽन्। चतु
र्थः। पंचमः। षष्ठाष्टमाभ्यां ञ च। षाष्ठः। षष्ठो भागः। षष्ठः। अष्टमः। आष्टमः। मानपश्वङ्गयोः कन्

ग्रादेशोयंग्धासू ४

मन्नंपैत्॥ अष्टमो भागः॥ ञ

लुकौ च।५ षष्ठाष्टमाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वंगे च वाच्ये। षष्ठको भागः। पश्वंगं चेत्। त्रयस्य
अन्ते वा लुक्। चकाराद्यथाप्राप्तं। षष्ठ। षाष्ठ। आष्टमः। आष्टमः। महाविभाषया सिद्धे लुग्वचनं क्वचि-
न्नोनिवृत्त्यर्थं चितिज्ञापयति। एकादाकिनिच्चासहाये। चात्कन्लुकौ। एकः। एकाकी। एककः। भूतपूर्वे
चरट्। अदृष्टपूर्वः आढ्यचरः। षष्ठ्या रूप्य च। षष्ठ्यन्तात् भूतपूर्वेर्थे रूप्यः स्यात् चरट् च। कृष्ण-
स्य भूतपूर्वो गौः कृष्णरूप्यः। कृष्णचरः। नामितिला दिषु रूप्यस्या परिगणितत्वान्न स्वं वा। श्रुमा
यादृक् तत् सर्वं श्रुत्वा रूप्यः। अतिशायने तमबिष्ठनौ। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अय-
मेषामतिशयेनाढ्यः आढ्यतमः। लघुतमो लघिष्ठः। तिङश्च। तिङन्तादतिशये द्योत्ये तमप् स्यात्। तर-
तम॥ पोघ। एतौ घसंज्ञौ स्तः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। किमेत्तिङोव्ययाच्च यो घस्त-
दन्तादाम् स्यान्न तु द्रव्यप्रकर्षे। किंतमां। प्राह्णेतमां। पचतितमां। उच्चैस्तमां। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः। द्वि-
वचनविभज्योपपदे तरबीयसुनौ। द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोर-
पवादः। अयमनयोरतिशयेन लघुः लघुतरो लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः। पटीयांसः। अ- ॥रू॥

॥[illegible]॥ जादी गुणवचनादेव। इष्ठन्नीयसुनौ गुणवचनादेव स्तः। नेह। पाचकतरः। पाचकतमः। तुश्छन्दसि। तृन्-
तृजन्तादिष्ठन्नीयसुनौ स्तः। तुरिष्ठेमेयस्सु। तृशब्दस्य लोपः स्यादिष्ठेमेयस्सु परेषु। अतिशयेन कर्ता करिष्ठः।

दोहीयसी धेनुः। प्रशस्यस्य श्रः॥ अस्य श्रादेशः स्यादजाद्योः। प्रकृत्यैकाच्॥ इष्ठादिष्वेकाच् प्रकृत्या। श्रेष्ठः।
श्रेयान्॥ ज्य च॥ प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः॥ ज्यादादीयसः॥ आदेः परस्य। ज्यायान्॥ वृद्ध-
स्य च॥ ज्यादेशः स्यादजाद्योः। ज्येष्ठः। ज्यायान्॥ अंतिकबाढयोर्नेदसाधौ॥ अजाद्योः। नेदिष्ठः। नेदीयान्।
साधिष्ठः। साधीयान्॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः॥ एषां यणादिप-
रं लुप्यते पूर्वस्य च गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसुन्।
ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा। क्षेपिमा। क्षोदिमा॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदी-
र्घवृंदारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृंदाः॥ प्रियादीनां क्रमात् प्रादयः स्युरिष्ठादिषु। प्रेष्ठः। स्थेष्ठः।
स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृंदिष्ठः। एवमीयसुन्। प्रियोरुबहुलगुरुदीर्घा-
णां पृथ्वादित्वात् प्रेमा इत्यादि। बहोर्लोपो भू च बहोः॥ बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः।
भूमा। भूयान्॥ इष्ठस्य यिट् च॥ बहोः परस्य इष्ठस्य लोपः स्याद्यिडागमश्च। भूयिष्ठः॥ युवाल्पयोः कनन्यत-
रस्यां॥ एतयोः कनादेशो वा स्यादिष्ठेयसोः। कनिष्ठः। कनीयान्। पक्षे यविष्ठः। अल्पिष्ठः इत्यादि॥ विन्मतो-
र्लुक्॥ विनो मतुपश्च लुक् स्यादिष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेन त्वग्वा-
न् त्वचिष्ठः। त्वचीयान्॥ प्रशंसायां रूपप्॥ सुबंतात्तिङंताच्च॥ प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचति-

रूपं। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। ईषदूनो विद्वान् विद्वत्कल्पः। यशस्कल्पं। यजुष्कल्पं। विद्वद्देश्यः।
विद्वद्देशीयः। पचतिकल्पं। विभाषासुपो बहुच् पुरस्तात्तु। ईषदसमाप्तिविशिष्टे सुबंताद्बहुज्वा स्यात्स
च प्रागेव न तु परतः। ईषदूनः पटुः बहुपटुः। पटुकल्पः। सुपः किं। यजतिकल्पं। प्रकारवचने जातीयर्। प्रकार
ति चायम्। धात्वर्थे तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः। अग्निसाकः। इवे प्रतिकृतौ विद्यात्प्राक्कुत्स्याधिकारः।
अव्ययसर्वनाम्नामकच् प्राक् टेः। तिङश्चेत्यनुवर्तते। कस्यचदः। कृतोत्यपत्यदकारेणात्देशः स्यात्कच।
अज्ञाते। कस्यायमश्वो ऽश्वकः। उच्चकैः। नीचकैः। सर्वके। विश्वके। ओकारसकारभकारादौ सुपि सर्वना

९५

म्नष्टेः प्रागकच् पूर्वकपो। आवकयोः। युष्मकासु। अस्मकासु। युष्मकाभिः। अस्मकाभिः। ओकारेत्यादि
किं। त्वयका मयका। अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः। सिवादेयादयः परं। तूष्णीकामास्ते। शीले
कोमलोपश्च। तूष्णींशीलः तूष्णीकः। पचतकि। जल्पतकि। धकित्। हिरुकम्। कुत्सितो ऽश्वो ऽश्वकः। संज्ञा
यां कन्। कुत्सितः स्यात् दंतौ नु वे संज्ञा गम्यते। शूद्रकः। राधकः। स्वार्थे एव च। अनुकंपायां। पुत्रकः।
अनुकंपितः पुत्र इत्यर्थः। नीतौ च तद्युक्तात्। सामदानादिरूपा या नीतिः तस्यां गम्यमानायामनु
कंपायुक्तात्प्रत्ययः स्यात्। हं तते धानकाः। गुडकाः। एहकः। अहकि। सर्वेषामनुकंप्यमाना प्रत्ययः।
अनेनतु परं परासंबंधे पातिविशेषः। बह्वचो मनुष्यनाम्नष्ठज्वा। सर्वत्र बहुपाविषये। घनिल

199

योवा। तथैव। ठञादावुर्ध्वं द्वितीयादचः। अस्मिन्नकारोप्यष्टोऽजादि प्रत्यये परतस्मिन् परे संकृते द्वितीया
दचऊर्ध्वं सर्वं लुप्यते। अनुकंपितो देवदत्तः देविकः। देवियः। देविलः। देवदत्तकः। अनुकंपितो वायुदत्तः।
वायुकः। ग्रहणमुकोद्वितीयत्वेक विधानार्थम्। वायुदत्तः। वायुकः। पित्तकः। चतुर्थादचऊर्ध्वस्य लोपो
वाच्यः। अनुकंपितो बृहस्पतिदत्तो बृहस्पतिकः। अनजादौ च विभाषा लोपो वक्तव्यः। देवदत्तकः। दे
वकः। लोपः सर्वपदस्य च। दत्तिकः। दत्तियः। दत्तिलः। दत्तकः। विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वा। लोप
वाच्यः। देवदत्तः। दत्तः। देवः। सत्यभामा। भामा। सत्या। भामा। उवर्णाल्लइलस्य च। भानुदत्तः। भानुलः। ऋवर्णा
न्न। द्वापि। सवित्रियः। सवितृकः। चतुर्थादेरजादौ च लोपः सर्वपदस्य च। अप्रत्यये तथैवेष्टउवर्णाल्लइलस्य
च। एतन्न श्लोकवार्त्तिकं व्याख्यातं व्याख्यातं। सत्यभामा। भामा। सत्या। प्रावादुपादे रजेडश्चतुर्वोच। उपधार
सर्वसर्वादिपदिकास्त्वविशेषः। अडचउवुए तोरूपः। वाघथाशान्तं प्राचां ग्रहणं जनार्थं। अनुकंपित उ
पेन्द्रदत्तं उपडः। उपकः। उपिकः। उपियः। उपिलः। उपेन्द्रदत्तकः। षडूपाणि। जातिनाम्नः कन्। मनुष्यनाम्न
इत्येव। जातिशब्देभ्यो मनुष्यनामधेयं तस्मात् कन् स्यादनुकंपायां नीतौ च। सिंहकः। [illegible] द्विती
यांसंध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः। कहोडः। कहिकः। एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः। वागाशी
र्दत्तः। वाचिकः। कथं षडंगुलिदत्तः। षडिक इति। षषष्ठा [illegible] वितिवचनात्सिद्धं। श्रीवलमुपरि विशाल

मू२ रू४
दि१

त्रि॰३

वुरुणार्यमादीनां तृतीयात्॥ एषाम्मनुष्यनाम्नां ठजादौ परे तृतीयादच ऊर्ध्वं लोपः स्यात् सर्वं विभा
षा॥ पद्मादः॥ अनुकंपितः शेवलदत्तः॥ शेवलिकः॥ शेवलिकः॥ सुपरिकः॥ विशालिकः॥ वरुणिकः॥ अर्यमिकः॥
=गैनो तस्योत्तरलोपः लोपश्च॥ अजिनान्तमनुष्यनाम्नो वुक पायां तस्य वोत्तरपदलोपः॥ अनुकंपितो
व्याघ्राजिनो व्याघ्रकः॥ सिंहकः॥ अल्पे॥ कः स्यात्॥ अल्पं तैलं तैलकं॥ ह्रस्वे॥ ह्रस्वो वृक्षकः॥ संज्ञायां कन्॥ ह्रस्वे

रसो ४

हनुका या संज्ञा तस्यां गम्यमानायां कन्॥ सर्वस्यापवादः॥ वंशकः॥ वेणुकः॥ कुटीशमीशुंडाभ्यो रः॥ ह्रस्वा
कुटी कुटीरः॥ शमी शमीरः॥ शुंडारः॥ कुत्वा डुपच्॥ ह्रस्वा कुतूः कुतुपः॥ कुतूः चर्मस्नेहपात्रं ह्रस्वा सा कुतुपः॥
मन्॥ कासूगोणीभ्यां ष्टरच्॥ आयुधविशेषः कासूः॥ ह्रस्वा कासूतरी॥ गोणीतरी॥ वत्सोक्षाश्वर्ष
भेभ्यश्च तनुत्वे॥ वत्सतरः॥ द्वितीयवयःप्राप्तः॥ उक्षतरः॥ अश्वतरः॥ ऋषभतरः॥ भारवहननिमित्ततनुत्वे एवायं॥ किंय
त्तदो निर्द्धारणे द्वयोरेकस्य डतरच्॥ अनयोः कतरो वैष्णवः॥ यतरः॥ ततरः॥ महाविभाषया कः॥ यः॥ सः॥ वा बहू

नो

ब जातिपरिप्रश्ने डतमच्॥ बहूनां मध्ये निर्द्धारणे डतमच् वा स्यात्॥ जातिपरिप्रश्न इति प्रत्याख्यातमाकरे॥
कतमो भवतां कठः॥ एवं यतमः॥ ततमः॥ वाग्रहणमकजर्थं॥ यकः॥ सकः॥ महाविभाषया यः॥ सः॥ किमोऽस्मिन् विषे

॥१४०॥

येडतरजपि॥ कतरः॥ एकाच्च प्राचां॥ डतरच् डतमच्च स्यात्॥ अनयोरेकतरो मैत्रः॥ एषामेकतमः॥ अवक्षेपणे
कन्॥ व्याकरणकेन गर्वितः॥ येनेतरः कुत्स्यते तदिहोदाहरणं॥ स्वतः कुत्सिते तु कुत्सितो ... स्या॥ भागिनी

॥१४०॥

पानोहरणे विधिः॥ ॥इवे प्रतिकृतौ कन् स्यात्॥ अश्व इव या प्रतिकृतिः॥ अश्वकः॥ प्रतिकृतौ किम्॥ गौरिव गवयः॥

संज्ञायां च। इवार्थे कन्स्यात्समुदायश्चेत्संज्ञा॥ अप्रतिकृत्यर्थ आरंभः॥ अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः।
लुम्मनुष्ये। संज्ञायां विहितस्य कनो लुप्स्यान्मनुष्ये वाच्ये। चंचा तृणमयः पुमान्। चंचेव मनुष्यः चंचा। वध्रिका।
जीविकार्थे चापण्ये। जीविकार्थं यद्विक्रीयते माणं तस्मिन्वाच्ये कनो लुप्स्यात्। वासुदेवः। शिवः। स्कंदः। देवलकानां जी
विकार्थासु देवप्रतिकृतिष्विदं। अपण्य इति किं। हस्तिकान्विक्रीणीते। देवपथादिभ्यश्च। कनो लुप्स्यात्। देवपथः।
हंसपथः। आकृतिगणोयं। वस्तेर्ढञ्। इवेत्यनुवर्तते। प्रतिकृताविति निवृत्तं। वस्तिरिव वास्तेयं वास्तेयी। शिलाया
ढः। शिलाया इति योगविभागाड्ढञपीत्येके। शिलेव शिलेयं। शैलेयं। शाखादिभ्यो यः। शाखेव शाख्यः। मुख्यः।
जघन्यः। अग्र्यः। शरण्यः। द्रव्यं च भव्ये। द्रव्यमयं ब्राह्मणः। कुशाग्राच्छः। कुशाग्रमिव कुशाग्रीया बुद्धिः। समासा
स्या॰ च्च तद्विषयात्। इवार्थविषयात्समासाच्छः स्यात्। काकतालीयो देवदत्तवधः। इह काकतालसमागमसदृशश्चोरस
मागम इति समासार्थः। अयुक्तः काकमरणसदृशश्चैत्रवध इति प्रत्ययार्थः। अजाकृपाणीयः। अतर्कितोपनत इति फ
लितोर्थः। शर्करादिभ्योण्। शर्करेव शार्करं। अंगुल्यादिभ्यष्ठक्। अंगुलीव आंगुलिकः। भरुजेव भारु
जिकः। एकशालायाष्ठजन्यतरस्यां। एकशालाशब्दादिवार्थे ठज्वा। पक्षे ठक्। एकशालेव एकशालिकः। ऐकशा
लिकः। कर्कलोहितादीकक्। कर्कः शुक्लोऽश्वः स इव कार्कीकः स्फटिकः। लौहितीकः। पूगाञ्ञ्योऽग्रामणीपू
र्वात्। इवार्थो निवृत्तः। नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः। तद्वाचकात्स्वार्थे ञ्यः
स्यात्। लोहितध्वज्यः। व्रातच्फञोरस्त्रियां। व्रात। कापोतपाक्यः। च्फञ्। कौंजायन्यः। ब्राध्नायन्यः। आयुधजीवि

संघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात्॥ वाहीकेषु ये आयुधजीविसंघस्तद्वाचिनः स्वार्थे ञ्यड् स्यात्॥ क्षौ
द्रक्यः। मालव्यः। स्त्रियां ङीप्। क्षौद्रकी। आयुधेति किं। मल्लाः। संघेति किं। सम्राट्। वाहीकेषु किं। शाबराः। अब्रा
ह्मेति किं। गोपालवाः। शालंकायनाः। अब्राह्मणेतद्विशेषग्रहणं। राजन्ये। स्वरूपग्रहणं। वृकाट्टेण्यण्। आ
युधजीविसंघवाचकात्स्वार्थे। वार्केण्यः। आयुधेति किं। जातिशब्दान्मा भूत्। दामन्यादित्रिगर्तषष्ठाच्छः।
दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः स्यात्। त्रिगर्ताः षष्ठो येषां ते त्रिगर्तषष्ठाः।
आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी। क्रौष्टकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः। दामनीयः। दाम
नीयौ। दामनयः। औलपि। औलपीय। त्रिगर्तो। कौण्डोपरथीयः। दाण्डकीयः। पर्श्वादियौधेयादिभ्यामणञौ
ञौ। आयुधजीविसंघवाचिभ्यामेभ्यः क्रमादणञौ स्तः स्वार्थे। पार्शवः। पार्शवौ। पर्शवः। यौधेयः। यौधेयौ।
यौधेयाः। अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्। अभिजिदादिभ्योऽण्णन्तेभ्यः
स्वार्थे यञ्। अभिजितोऽपत्यमाभिजितः। आभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौ
मत्यः। ञ्यादयस्तद्राजाः। एभ्यः ञ्यादयस्तद्राजसंज्ञाः स्युः। तेनाप्ययौ बहुषु लुक्। लोहित
ध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्राध्नायना इत्यादि। पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च। लो
पवचनमनैमित्तिकत्वार्थं। अतो न स्थानिवत्। पादः पत्। तद्धितार्थ इति समासे कोऽप्ययं। वुन्नन्तं स्त्री
पामेव। द्वौ द्वौ पादौ ददातीति द्विपदिकां। द्विशतिकां। पादशतग्रहणमनर्थकं। अन्यत्रापि दर्शनात्। द्विमोदकि

कां। ईड् व्यवसर्गयोः आशु स्यात्। अविश्वासार्थमिदं ह्रीपोष्टे दंडइयति। द्विपारिकः। व्यवसर्जनि रदग्गो
पार्थः। स्थूला दिभ्यः प्रकारवचने कन्। जाता पुरोपवादः। स्थूल प्रकारः स्थूलकः। अणुकः। चंव बृहत्तोक
पसंख्यामं। चंचलः। बृहत्कः। सुरा पाश्राहे। सुरवर्णो हि सरकः। अनत्यंतगतो क्तात्। छिन्नकः। भिन्नकोन
सामिवचने। सामिप पर्याये उपपदे क्तांते तान्वके पु। सामिकृतं। अर्द्धकृतं। अनेत्यंतगतो रिह प्रकृत्यैवाभि
मप
धाना त्स्मर्वेणाकन्न शाकः। इदमेवानिषेधहत्वज्ञैर्यंतस्वार्थिकमपि कनं तापपति। बहुतरकः। बृहत्तरको बृह
च्या आच्छादने। कन्स्यात्। हूतो आचारोत रासंगो समो बृहतिका तथा। आच्छादनेकिं। बृहती छंदः। अषडाउ
शितं गवलंकर्मालं पुरुषाध्यु। तत् पदार्थवः स्वार्थे। अषडक्षीणो मंत्रः। द्वाभ्यामेव कृतं इत्यर्थः। आशितंगा
वो स्मिन्नित्याशितं गवीनमरण्यं। निपातनात् सर्वस्य सुम्। अलं कर्मीणः। अलं कर्मतणः। जैः। अलं पुरुषी
एः। ईश्वरार्थीनः। निपातस्वकत्तर स्त्रवैविस्ताषात् ग्रहणात्। अन्येपि कविकस्वार्थे कानि यमिष्यंते तवादयः
णाकृतः। व्यादपः प्राग्वृत्तः। आमात् इव अज्ञपरः। बृहती जात्यंता समासांताश्येति। विभाषा चेरदिक्
[illegible] ह्निस्व यां। अदिक् स्त्रीव [illegible] स्यंता प्रातिपदिको खः स्याद्धात्वार्थे। प्राक्। प्राचीनं। प्रसक्। प्रतीचीनं।
अवाक्। अवाचीनं। निकृष्टप्रतिकृष्टावरेफ पाथाव माथमाः। अर्वतं मंथनीयं वाक्। अर्वाचीनं। अदिक्स्त्रि
याकिम्। प्राचीदिक्। दिग्गुहणं किं प्राचीनाब्राह्मणी। स्त्रीयहणं किं। प्राचीनंग्राम ह्याम्नाः। जायंताः क्रु
बंधुनि ब्राह्मण जातीयः। बंधुनिकिं। ब्राह्मण जातिः शोभना। जाते चे उकं इत्यंबंधु। स्नानातो विभाषा सरखा

नेनेतिचेत्। सस्थानेन तुल्येन चेत् स्थानान्तमर्थवत्स्यार्थ। पितृस्थानीयः। पितृस्थानः। सस्थानेन किं।
गोस्थानः। अनुगादिनष्ठक्। अनुगदति अनुगादी। स एव आनुगादिकः। विसारिणो मत्स्ये। अ
ण् स्यात्। वैसारिणः मत्स्यः। किं विसारी देवदत्तः। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। अभ्या
वृत्तिर्जन्म क्रियाजन्मगणने वृत्तेः संख्याशब्दात्स्वार्थे कृत्वसुच् स्यात्। पंचकृत्वो भुंक्ते। संख्यायाः किं।
भूरिवारान् भुंक्ते। द्वित्रिचतुर्भ्यः सुच्। कृत्वसुचोऽपवादः। द्विर्भुंक्ते। त्रिः। चतुः। एकस्य सकृच्च।
सकृदित्यादेशः स्यात् सुच् च। सकृद्भुंक्ते संयोगान्तस्येति सुचो लोपः। ननु हल्ङ्याब्भ्य इति लोपे
सति स्थानिवत्त्वात् सुचोऽपि तद्योगात्। विभाषा बहोर्धाऽविप्रकृष्टकाले। अविप्रकृष्टे आसन्ने। आसन्नः
बहुधा बहुकृत्वो वा दिवसस्य भुंक्ते। आसन्नकाले किं। बहुकृत्वो मासस्य भुंक्ते। तत्प्रकृतवचने मयट्। प्राचुर्येण
प्रकृतं प्रकृतं तस्य वचने प्रतिपादने। भावेऽधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नमन्नमयं। अपूपमयं
पर्वापूपमयी। द्वितीये। अन्नमयो यज्ञः। अपूपमयं पर्व। समूहवच्च बहुषु। सामूहिकाः प्रत्ययाः अ
तिदिश्यन्ते। चान्मयट्। मोदकाः प्रकृताः। मोदकिकं। मोदकमयं। शाष्कुलिकं। शाष्कुलीमयं। द्वितीये
॥२८४॥ मोदकिको यज्ञः। मोदकमयः। अनन्तावसथेतिहभेषजाञ्ञ्यः। अनन्त एवानन्त्यं। आवसथ एवावस ॥२८५॥
थ्यं। इतिहेति निपातसमुदायः। ऐतिह्यं। भेषजमेव भैषज्यं। देवतान्तात्तादर्थ्ये यत्। तदर्थमेव तादर्
थ्यं। स्वार्थे ष्यञ्। अग्निदेवतायै इदमग्निदेवत्यं। पितृदेवत्यं। पादार्घाभ्यां च। पादार्थमुदकं पाद्यं। अ

205

ध्यं। नवस्य नू आदेशः। त्नप्तनप्खाश्च प्रत्ययाः॥ नूत्नं। नूतनं। नवीनं। नश्च पुराणे प्रात्॥ पुरा
णे वर्तमानात् प्रशब्दात् नो वक्तव्यः। चात् पूर्वोक्ताः। प्रणं। प्रत्नं। प्रतनं। प्रीणं॥ भागरूपनामभ्यो धेयः॥ भा
गधेयं। रूपधेयं। नामधेयं॥ आग्नीध्रसाधारणादञ्॥ आग्नीध्रं। साधारणं। स्त्रियां ङीप्। आग्नीध्री।
साधारणी। स्त्रियां ङीप्। आग्नीध्री। साधारणी॥ अतिथेर्ञ्यः॥ तादर्थ्य इत्येव। आतिथ्यम् इदम् आति
थ्यं॥ देवात्तल्॥ देव एव देवता॥ अवेः कः॥ अविरेव अविकः॥ यावादिभ्यः कन्॥ याव एव यावकः॥ लोहि
तान्मणौ॥ लोहित एव मणिः लोहितकः॥ वर्णे चानित्ये॥ लोहितकः कोपेन। लोहिताल्लिंगबाधनं वा॥
वा। लोहितिका लोहिनिका कोपेन। रक्तो लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात् कन् स्या
त्। लिंगबाधनं वेत्येव। लोहितिका। लोहिनिका। लोहितिका शाटी॥ कालाच्च॥ वर्णे चानित्ये इ
ति द्वयमनुवर्तते। कालकं मुखं वैलक्ष्येण। कालकः पटः। कालिका शाटी॥ विनयादिभ्यष्ठक्॥ वि
नय एव वैनयिकः। सामयिकः। उपाय एव ह्रस्वत्वं च। औपयिकः॥ वाचो व्याहृतार्थायाम्॥ संदिष्टार्था
यां वाचि विद्यमानात् वाक्शब्दात् स्वार्थे ठक्। संदेशवाग् वाचिकं स्यात्॥ तद्युक्तात् कर्मणोऽण्॥ कर्मैव
कार्मणं। वाचिकं श्रुत्वा क्रियमाणं कर्म इत्यर्थः॥ ओषधेरजातौ॥ स्वार्थेऽण्। औषधं पिबति। अ
जातौ किं। ओषधयः क्षेत्रे रूढाः॥ प्रज्ञादिभ्यश्च॥ प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। दैवतः। बान्धवः। मद

स्तिकन्नपरदेवमृत्तिका॥ सस्नोअसांसाधुं॥ रूपपोपवादः॥ अभ्यास्ता मृतम्स्सा॥ मस्त्रा॥ उत्तरवा
न्यतरस्यामिह पाणिनीयोयं॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्यां॥ बहूनि ददाति बहुशः॥ अ
ल्पानि अल्पशः॥ बह्वल्पार्थान्मंगलामंगलवचने॥ नेह॥ बहु ददाति श्राद्धेषु॥ अल्पमभ्युदयि
केषु॥ संख्यैकवचनाच्च वीप्सायां॥ द्वौ द्वौ ददाति द्विशः॥ माषं माषं माषशः॥ प्रस्थशः॥ परिमाणशब्दाव
तावेकार्थ एव॥ संख्यैकवचनात्किं॥ घटं घटं ददाति॥ वीप्सायां किं॥ द्वौ ददाति॥ कारकात्किं द्वयोर्बहूपो द्वयोः
स्वामी॥ प्रतियोगे पंचम्यास्तसिः॥ प्रतिना कर्मप्रवचनीयेन योगे या पंचमी विहिता तदंतात्तसिः स्यात्॥
प्रद्युम्नः कृष्णतः प्रति॥ आद्यादिभ्य उपसंख्यानं॥ आदितः॥ आदितः मध्यतः अंततः पृष्ठतः पार्श्वतः॥ आ
कृतिगणोयं॥ स्वरेण स्वरतः॥ वर्णेन वर्णतः॥ अपादाने चाहीयरुहोः॥ अपादाने या पंचमी तदंतात्तसि
स्यात्॥ ग्रामादागच्छति ग्रामतः॥ अहीयरुहोः किं॥ स्वर्गाद्धीयते॥ पर्वतादवरोहति॥ अतिग्रहाव्यथन
क्षेपेष्वकर्तरि तृतीयायाः॥ अकर्तरि तृतीयांतात्तसिः॥ अतिक्रम्य ग्रहो अतिग्रहः॥ चारित्रेणा
तिगृह्यते॥ चारित्रतोऽतिगृह्यते॥ चारित्रेणान्यानतिवर्तते इत्यर्थः॥ अव्यथनमचलनं वृत्तेन न व्यथते वृ
त्ततो न व्यथते वृत्तेन न चलतीत्यर्थः॥ क्षेपो वृत्तेन क्षिप्तः वृत्ततः क्षिप्तः॥ वृत्तेन निंदित इत्यर्थः॥ अकर्त
किं॥ देवदत्तेन क्षिप्तः॥ हीयमानपापयोगाच्च॥ × कम्य × हीयमानपापयुक्तादकर्तरि तृतीयांता

द्वातसिः॥ वृत्तेन हीयते वृत्ततो हीयते वृत्ततोऽपापः वृत्ततः पापः॥ क्षेपस्य ॥ क्विक्षायामिदं ॥ पक्षेनुश्वेयि
॥ सिद्धं ॥ कर्त्तरि किं ॥ देवदत्तेन हीयते ॥ षष्ठ्या व्याश्रये ॥ षष्ठ्यंताद्द्वातसिर्नानापक्षसमाश्रये ॥ देवाः अर्जु
नतो भवन्॥ कर्णा आदित्यः तोभवन् ॥ अर्जुनस्य पक्षे इत्यर्थः ॥ व्याश्रये वृक्षस्य धारणा ॥ रोगाच्चाप
नयने ॥ रोगवाचिनः षष्ठ्यंताद्द्वातसिः प्रचिकासायां प्रवाहिकातः कुरु ॥ × किं × प्रतिकारमस्याः कुर्विय
र्थः ॥ अपनयने किं ॥ प्रवाहिकायाः प्रकोपनं करोति ॥ कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः ॥ अकृततत्र
वदिति वक्तव्यं ॥ विकारस्य मवोग्राह्युक्ता प्रकृतौ वर्त्तमानाद्विकारशब्दः स्वार्थे च्विर्वाच्यः ॥ कृ रेण्य
ते तं करोति कृष्णी करोति ॥ अक्षी भवति ॥ गंगी स्यात् ॥ अर्थैस्येच्वाविति नेति वाच्यं ॥ दोषा नक्तमहः
दिवा नक्तनारर्त्तः ॥ एतच्चाव्ययात्वास्थेति सर्वे ॥ स्याच्चेऽर्को ॥ क्यच्च्योश्च ॥ हलः परस्यापत्ययकार
स्य लोपः स्यात् क्ये च्वौ च परतः ॥ गार्गीभवति ॥ च्वौ च ॥ च्वौ च परे पूर्वस्य दीर्घः स्यात् ॥ शुची भवति ॥ पटूस्या
त् ॥ अव्ययस्य च्वौ दीर्घत्वं नेति केचित् ॥ तन्निर्मूलं ॥ स्वाभिस्यादितिनुमहा भिक्षाषया ॥ दोषाभवदिदं स्वस्तोस्या
दित्यपि पक्षेस्यादिति केचित् ॥ अरुः ॥ यदि नेष्यते तर्हि ॥ नतिथानात् ॥ च्विरेवनो सद्यन इत्यस्य ॥ री इतः ॥ मात्री
करोति ॥ अरुर्मनश्चक्षुश्चेतो रहो रजसां लोपश्च ॥ एषां लोपः स्यात् च्विश्च ॥ अरू करोति ॥ उन्मनी स्यात् ॥ उ

प८

208

शुक्लं करोति। विवेकी करोति। किरही करोति। विरजी करोति। विभाषा साति कार्त्स्न्ये। च्विविषये साति
र्वा स्यात् साकल्ये। सात्पदाद्योः सस्य षत्वं न स्यात्। दधि सिंचति। कृत्स्नं शस्त्रम् अग्निः संपद्यते। अग्निसा
सा द्रवति। महाविभाषया वाक्यमपि। कार्त्स्न्ये किं। एकदेशेन शुक्ली भवति पटः। अभिविधौ संप
दा च। संपदा कृभ्वस्तिभिश्च योगे सातिर्वा स्यादभिव्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। संपदा तु वाक्यमेव।
अग्निसात्संपद्यते। अग्निसाद्भवति शस्त्रं। अग्नी भवति। जलसात्संपद्यते। जली भवति लवणं। ए
कस्या व्यक्तेः सर्वावयवावच्छेदेनान्यथाभावः कार्त्स्न्यं। बहूनां व्यक्तीनां किंचिदवयवावच्छेदेनान्य
थाभावोऽभिविधिः। तदधीनवचने। सातिः स्यात् कृभ्वस्तिभिः संपदा च योगे। राजसात्संपद्यते राजाधी
नमित्यर्थः। देये त्रा च। तदधीने देये त्रा स्यात् सातिश्च कृञादियोगे। विप्राधीनं देयं करोति विप्रत्रा करोति। वि
प्रत्रा संपद्यते। पक्षे विप्रसात्करोति। देये किं। राजसाद्भवति राष्ट्रं। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीया
सप्तम्योर्बहुलं। एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वंदे रमे वा। बहुलोक्तेरन्यत्रापि।
बहुत्रा जीवतो मनः। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्। द्व्यजेवावरं न्यूनं न तु ततो न्यूनमनेका
॥१४४॥ ज्ञितियावत्। तादृशमर्धं यस्य तस्माडाच् स्यात् कृभ्वस्तिभिर्योगे। डाचि विवक्षिते द्वे बहुलं। नित्यमाम्रे ॥१४४॥
डिते डाचीति वक्तव्यं। डाच्परं यदाम्रेडितं तस्मिन् परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तका
रपकारयोः पकारः। पटपटाकरोति। अव्यक्तानुकरणात् किं। दृषत्करोति। द्व्यजवरार्धात् किं। श्रत्करो

209

ति। श्रावरेति किं। खरटखरटा करोति। अपटअपटा करोति। अनेकाच इत्येव कृस्त्वायितुं पुकं।
एवं हि डार्वांति परस-न्म इत्येव द्वित्वे सुप्रवेचव धेयं। अनितौ किं। पटिति करोति। कृञो द्वितीयतृ
तीयशंबबीजा कृषौ। द्वितीयाभ्यो दिडाच्स्यात् कृञ एव योगे कर्षणे। वकुलोकेव्यक्तानुकर
णादन्यं डाचि न द्वित्वं। द्वितीयं तृतीयं कर्षणं द्वितीया करोति। तृतीया करोति। शंबशब्दः प्र
तिलोमे। अनुलोमे कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति शंबा करोति। बीजेन सह कर्षति बीजा करोति।
संख्यायाश्च गुणांतायाः। कृञो योगे कृषौ डाच् स्यात्। द्विगुणा करोति। क्षेत्रं। क्षेत्रकर्मकं द्विगुणक
र्षणं करोतीत्यर्थः। समयाच्च यापनायां। कृषाविति निवृत्तं। कृञो योगे डाच् स्यात्। समया करोति। कालं
यापयतीत्यर्थः। सपत्रनिष्पत्रादतिव्यथने। सपत्रा करोति मृगं। सपुंखशरस्य प्रवेशनेन सपत्रं करोती
त्यर्थः। निष्पत्रा करोति। सपुंखस्य शरस्यापरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः। अतिव्यथने किं।
सपत्रं निष्पत्रं वा करोति भूतलं। निष्कुलान्निष्कोषणे। निष्कुला करोति दाडिमं। निर्गतं कुलमंतरवयवा
नां समूहो यस्मादिति बहुव्रीहेर्डाच्। सुखप्रियादानुलोम्ये। सुखा करोति स्वामिनं। प्रिया करोति गुरुं। अ
नुकूलाचरणेनानंदयतीत्यर्थः। दुःखात्प्रातिलोम्ये। दुःखा करोति स्वामिनं। पीडयतीत्यर्थः। शूलात्पाके।
शूला करोति मांसं। शूलेन पचतीत्यर्थः। सत्यादशपथे। सत्या करोति भांडं वणिक्। क्रेतव्यमिति तथ्यं क

रोतीत्यर्थः। शपथेनुसत्यं करोतीति विग्रहः। मद्रात्परिवापणे। मद्रशब्दो मंगलार्थः। परिवापणं मुंडनं।
मद्राकरोति कुमारं मंगलत्यमुंडनेन संस्करोतीत्यर्थः। भद्राच्चेति वक्तव्यं। भद्राकरोति। अर्थः भाव
ना। परिवापणे किं। भद्रं करोति। इति तद्धितप्रक्रिया। सर्वस्य द्वे इत्यधिकृत्य। नित्यवीप्सयोः। आ
भीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्। आभीक्ष्ण्यं तिङंते ष्वव्ययसंज्ञकेषु कृदंतेषु च।
पचापचति पचति। भुक्त्वा भुक्त्वा। वीप्सायां वृक्षं वृक्षं सिंचति। ग्रामो ग्रामो रमणीयः। परेर्वर्जने। परि
परि वंगेभ्यो वृष्टो देवः। वंगान्परिहृत्येत्यर्थः। परेर्वर्जने वा वचनं। परि वंगेभ्यः। उपर्यध्यधसः सामीप्ये। उप
र्युपरि ग्रामं। ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः। अध्यधि सुखं। सुखस्योपरिष्टात्समीपकाले दुः
खमित्यर्थः। अधोधो लोकं। लोकस्याधस्तात्समीपदेश इत्यर्थः। वाक्यादेरामंत्रितस्यासूयासंमति
कोपकुत्सनभर्त्सनेषु। असूयायां सुंदर सुंदर वृथा ते सौंदर्यं। संमतौ। देव देव वंद्योसि। कोपे दुर्वि
नीत दुर्विनीत इदानीं ज्ञास्यसि। कुत्सने। धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने। चोर चोर घातयिष्यामि
त्वां। एकं बहुव्रीहिवत्। द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्। तेन सुब्लोप पुंवद्भावौ। एकैकमक्षरं इह द्वयो
रपि सुपो लुकि सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप्। एकैकया आहुत्या इह सर्वत्रा
ये पुंवद्भावाद्वय यह विशेषः। न बहुव्रीहौ क्वचित्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थं। ते

न के २

211

नञ्प्राति द्विरवहुव्रीहौ सर्वनामता स्यादेवेति प्राञ्चः। वस्तुतस्तु भाष्यमते प्रत्याख्यानमेव तत्। स्तत्रमतेपि बहु
व्रीह्यर्थे। लौकिके विग्रहे निषेधकं न तु बहुव्रीहौ वितावहातिदेशः। किंच नास्ति। एकैकस्मै देहि। आचार्य वा
उपाध्यायो याधाहेस्तो बहुव्रीहिवद्भावः। गतगताः। चिरहस्यानुयुमानस्येय मुक्तिः। बहुव्रीहिवद्भावा स्सुब्लुक्। गतगा
ता। इह पुंवद्भावः। कर्मधारयवदुत्तरेषु। उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं। प्रयोजनं सुब्लोपपुंवद्भावा वां
तोदात्तत्वानि। प्रकारे गुणवचनस्य। सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्ता च कर्मधारयवत्। कर्मधारयवदु द्वे
त्तरेष्वित्यधिकारात्। तेन पूर्वस्यागस्य पुंवद्भावः। समासस्य अंतोदात्तत्वं च। पटुपट्वी। पटुपटुः पटुसदृश
ईषत्पटुरित्यर्थः। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्चेह ग्रहणं। शुक्लशुक्लं रूपं। शुक्ल
शुक्लः पटः। आनुपूर्व्ये द्वे वाच्ये। मूले मूले स्थूलः। संभ्रमेणाप्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः। सर्प सर्प
बुध्यस्व बुध्यस्व। सर्पः बुध्यस्व ३। क्रियासमभिहारे च। लुनीहि लुनीहीत्येवायं लुनाति। नित्यवीप्सयोरित्येवसि
द्धे प्रत्यायार्थे द्विराथ्यमिदं। पौनःपुन्ये पि लोपस्य सहसंगृहीतत्वात् कर्तालज्जुदे। कर्मव्यतिहारे सर्वनाम्नो
द्वे वाच्ये। समासवच्च बहुलं। बहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यं। असमासवद्भा
वे पूर्वपदस्य सुपः सुर्वक्तव्यः। अन्योन्यं विप्रा नमंति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतं। अन्योन्यस्मै द
त्तमित्यादि। अन्योन्यस्य पांशुकरे रामरथं न हीति माघः। एवं परस्परं। अत्र कस्कादित्वात् विसर्जनीयस्य सः। इ
तरेतरं इतरेतरेण इत्यादि। स्त्रीनपुंसकयोरुत्तरपदस्था यां विभक्तेराम्भावो वा वाच्यः। अन्योन्याम् अन्यो

न्यं। परस्परं परस्परं। इतरेतरामितरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशोद्दि
तो याप। एव। भाष्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि स्त्रतायादिद्वयं देवरूपमिच्छ हु। अन्ये
त्तदाहरणस्य दिक्त्वात् सर्वविभक्तौ मामादेशमाहुः। द्वन्द्वलक्षणत्वे सत्त्वाभावः क्लीबत्वाद्दिरहः स्वमोः। समासे
सोरलुक्तवेति सिद्धवालुलकाद्यपं। तथाहि। अन्योन्यं परस्परमित्येवं द्वन्द्वयोपिटा कर्मणाः। नत सर्वनाम्नो
वृत्ति इति पुंवद्भावः। अन्यपरयोरसमासवद्भावात्। न वद्विर्वचनमेवदृत्तिः। पायां प्रियः। ओ स्तत सामे याद्भाव
ति प्रसंगात्। अन्योन्यमितरेतरमित्यत्रवाइतरादित्य इत्यद्य प्राप्नः। अन्योन्यसंम क्रमहद्द्वियामं। अन्योन्या
श्रयः। परस्पराक्षिप्तसादृश्यं। अत्र दृष्टपरस्परे दित्यादौ सर्लुक्। वस्तुतः सर्ववाहुलकबलेन समाधेयं। अक
ति वार्त्तिकं भाष्योदाहरणं स्त्रियामिति सूत्रे अन्योन्यशब्दस्य तद्दिति भाष्यवाच्य प्रमाणमिति। अकृच्छ्रि
पस्कृत्वयोरन्यतरस्यां। प्रियप्रियेण ददाति। प्रिये गावा। सुखसुखेन। सुखेन वा। द्विर्वचने कर्मधारयवद्भावा
सृ। लुकि पुनस्तदेव वचनं। अतिप्रियमपि वस्तु अनायासेन ददातीत्यर्थः। यथास्वे यथायथं। यथास्वमिति
वीप्सायामव्ययीभावः। यो यः आत्मा यच्च आत्मीयं। यथास्वं तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्य
॥१४६॥ ते। यथायथं ज्ञाता। यथास्वं च भावमित्यर्थः। यथात्मीयमिति वा। द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणय
ज्ञपात्रप्रयोगाभिव्यक्तिषु। द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्य ॥१४६॥
ते एष्वर्थेषु। तत्र रहस्ये द्वन्द्वशब्दस्य वाच्ये। इतरेविषयत्वेनाः। द्वन्द्वं मन्त्रयते। रहस्यमित्यर्थः। मर्यादास्थि

213

न चौतिक्रमः॥ आचतुरं ह्यमे पशवो द्वंद्वं मिथुनायंते। माता पुत्रेण मिथुनं गच्छति। पौत्रेण प्रपौत्रेणापीति
मर्यादार्थः। व्युत्क्रमणं पृथगवस्थानं। द्वंद्वं व्युत्क्रांताः। द्विवर्गसंबंधेन पृथगवस्थिताः। द्वंद्वं यज्ञपा
त्राणि प्रयुनक्ति। द्वंद्वं संकर्षणवासुदेवौ। अभिव्यक्तौ साहचर्येणेत्यर्थः। योगविभागादन्यत्रापि द्वंद्व
मिष्यते॥ ॥ इति द्विरुक्तिप्रक्रिया॥ ॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यां पूर्वार्द्धं समाप्तं॥
॥

[OrderDescription]
,CREATED=09.10.20 10:55
,TRANSFERRED=2020/10/09 at 11:22:03
,PAGES=214
,TYPE=STD
,NAME=S0003948
,Book Name=M-1836-SIDHANT KOUMUDI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,